CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ई. नं. १६८८५

pāśupati purāṇa

मूल्य १५। रू.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१९८६ जनकराज

पशु॰प॰ श्रीगणेशायनमः॥ ॥ॐनमःश्रीपशुपतये॥ ॥यस्यवक्त्राद्विनिष्क्रान्ता वाग्वती
१ लोकपावनी॥नमामिशिरसादेवंशंकरंभुवनेश्वरम्॥ ॥सूतउवाच॥आसुरीसुप्रभाना
मनगरीलोकविश्रुता॥यत्रान्धकोऽसुरश्रेष्ठस्तपस्तेपेतिदुष्करम्॥महाश्मसकलंयत्रस
र्वतः प्रविकीर्यते॥पु--- समारब्धोयत्रदक्षः प्रजापतिः॥तीर्थंकनखलन्नामत्रिषुलो
केषुविश्रुतम्॥तीर्थिकैरसकृद्यत्रसेव्यतेस्वर्गकांक्षिभिः॥तत्रभागीरथीद्वारेभीष्मोधर्म पशु॰
विदांवरः॥मुनिमाराधयामासपुलस्त्यंलोकपूजितम्॥ततः कतिपयानेन---मु १
निपुंगवम्॥ददर्शजाह्नवीसूनुर्वरदानार्थमागतम्॥तत्क्षणाद्देवसंप्राप्तंभगवन्तंमहा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मुनिम् ॥ प्रणम्य चरणा मूर्द्ध्ना वाक्यमाह नृपात्मजः ॥ ॥ भीष्म उवाच ॥ राज्ञां चार्थवतां
चैव गन्तुं मार्गः प्रवर्त्तते ॥ निर्धनानां च सत्वानां न यस्यां मम रालयम् ॥ छेत्तारमिति वि
ज्ञेयं संशयानां महामुने ॥ अनेनाधिष्ठितो भक्त्या त्वं मया शास्त्रकोविद ॥ ― ― ―
न्धकारश्च मम चिन्ता निरोधिनम् ॥ छेत्तु महसि देवर्षे निर्मलैर्वचनांशुभिः ॥ एवं पृष्टो महा
प्राज्ञः पुलस्त्यो भगवान्मुनिः ॥ व्याजहार शुभं वाक्यं धर्मनित्यं सुसंहितम् ॥ ॥ पुलस्त्य
उवाच ॥ अस्ति पुत्र महाप्राज्ञ ब्रह्मणा किल भाषितम् ॥ सर्व पापहरं पुण्यं तीर्थं स्वर्ग
फलप्रदम् ॥ नैव दानेन नु स्वर्गं वक्ष्यते तत्वदर्शिभिः ॥ विद्यते स्वर्ग गमनं तीर्थस्नानफले
न च ॥ पर्वतस्य च माहात्म्यं तीर्थस्य च विशेषतः ॥ श्रूयतां श्रुति शास्त्राणां पुराणं पुण्य
विस्तरम् ॥ ब्रह्मणो वरदानेन सदारो देवपूजितः ॥ अपत्यानां शतं लेभे हिमवान चला

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पशु·पु·
२

धिपः ॥ दुरीरवीजं प्रथमंतीर्थनामकरोगिरीः ॥ द्रोद्धत्रको ऽथकासुन्दउज्जयन्तस्त
थैवच ॥ चित्रह्रदः सुहृदश्चकेतुमान्मणिमांस्तथा ॥ काभीरश्चसुनाभश्चचक्रनाभ
स्तथैवच ॥ गोमांश्चधेनुमांश्चैवव्याघ्रवान्पुष्पकस्तथा ॥ गिरिवैतरणश्चैवत्र्यामको
वृषभस्तथा ॥ वक्रनेमिः सुनेमिश्चचक्रपर्वतएवच ॥ चन्द्रोद्रोणश्चकाकन्दः कक
न्दस्कन्धएवच ॥ कुन्जश्चैवनिकुन्जश्चमुकुन्दः खण्डकस्तथा ॥ शिवकूटः सुवेरश्चपा
रियात्रस्तथैवच ॥ मृगेन्द्रशिखरश्चैवचन्दनागिरिरेवच ॥ पर्वतोमणिधातुश्चय
स्मान्मणिमतीनदी ॥ एतत्प्रभृतिशैलानांग्रामंसिद्धाश्रयंशुभम् ॥ मृगेन्द्रशिखरंता
वत्कीर्तयिष्यामिसुव्रत ॥ हिरण्यकशिपुंहत्वालीलयाकामरूपधृक् ॥ नरसिंहो रामः
मृगोभूत्वायस्मिन्नद्रौचचारह ॥ मृगमध्येप्रधानत्वान्मृगेन्द्रइतिकथ्यते ॥ मृगे २
न्द्रशिखरोनामतेनैवाविश्रुतोगिरिः ॥ तस्यमूर्द्धिमृगोद्यापिदृश्यतेस्मिन्शिलातनुः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पशु·पु· मितविक्रमे ॥ कृतप्रदानसहसायथाशक्त्या समादरात् ॥ भार्ययासहितो राजा मुनिनामार्गदे
शितः ॥ चित्तंनिधायतपसि हिमवन्तं विवेशह ॥ ततः संप्राप्तमात्रेणहिमवन्तंनगोत्तमम् ॥ अ
३ ब्रवीदीदृशंवाक्यंनारदोधर्मसंहितम् ॥ वाग्मती प्रभवाभ्यासे बहुपुष्पफलाकुले ॥ विष्णो × वाग्वती
र्विहारशैलेन्द्रे कुरुनामाश्रमंनृप ॥ कृत्वानु वसतिं राजन् वाग्मती प्रभवेगिरौ ॥ कालान्तरेण
नियतं विष्णुलोकमवाप्स्यसि ॥ वयश्चाप्य चलंभूयो राजंस्तव ममाज्ञया ॥ इत्युक्त्वा नारदो
धीमांस्तत्रैवान्तरधीयत ॥ ततस्तस्यवचः श्रुत्वा महर्षेरमितौजसः ॥ गिरेर्मनोरमेप्रस्थेवा
ग्मतीजलशोभिते ॥ मन्दमारुतविक्षेपनिपतत्कुसुमाकुले ॥ नानाविहंगसंघुष्टविलसन्मृ रामः
गसेविते ॥ तपोजाप्यपरो भूत्वा नारायणपरायणः ॥ चकारवसतिंतत्रसूर्यकेतुर्नराधिपः ॥ ३
॥ ॥ भीष्मउवाच ॥ वाग्मती नामविख्याता सरितस्मिन्समुद्भवा ॥ कस्मिन्नवसे राजा ता

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शृंगादिरोहणात्तस्य तुष्यते पुरुषोत्तमः ॥ तस्य प्रस्थं समाश्रित्य सूर्यकेतुर्नराधिपः ॥ समा
तुषेणादेहेन सूर्यलोकमगा मवान् ॥ ॥भीष्म उवाच ॥ कस्मिन्द्वीपेश्वरः श्रीमान्सूर्य
केतुर्नराधिपः ॥ कस्योपदेशाच्छैलेन्द्रं हिमवन्तं समाश्रितः ॥ ॥पुलस्त्य उवाच ॥ कृत्वा
निःक्षत्रियां पृथ्वीं भार्गवोमितविक्रमः ॥ जम्बूद्वीपे ददौ राज्यं स्वादरात्सूर्यकेतवे ॥ भुजवी
र्येणारामस्य पुत्रवत्परिरक्षितः ॥ ररक्ष राज्यं धर्मज्ञो निःशेषं हतकंटकम् ॥ एतस्मिन्नन्तरे
काले नारदो भगवान्मुनिः ॥ जगाम गेहं रत्नाढ्यं सूर्यकेतोर्महीपतेः ॥ राजालयं समासाद्य
महर्षिः पावकोपमः ॥ संपूजितो नरेन्द्रेण निषसाद वरासने ॥ पृच्छमानो नरेन्द्रेण महर्षि
र्धर्मकोविदः ॥ कृत्स्नं संश्रावयामास नित्यानित्यविवक्षया ॥ वचनान्तरे ततस्तस्य महर्षे
रमितौजसः ॥ विरक्तो लोकरतो धीमान्भीतः संसारपञ्जरात् ॥ राज्य धर्मं परित्यज्य भार्गवे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तच्च श्रावयतां मुने ॥ ॥पुलस्त्य उवाच ॥ सहस्रमेकं वर्षाणां प्रह्लादो दैत्यसत्तमः ॥ रुद्रमा
राधयामास पुरा तस्मिन् शिलोच्चये ॥ तपः प्रभावान्महतः संतुष्टो दितिनन्दनात् ॥ दृष्टमा
त्रोति हर्षेण मुमोच हसनं हरः ॥ हासात्सुनिकराद्दुष्ट्या देवदेवस्य धीमतः ॥ उत्पपात गिरेर्मू
र्ध्नि नदी पुण्यजलाश्रया ॥ हरहाससमुद्भूता फेनप्रस्यन्दवाहिनी ॥ वचनात्संभवो यस्मा
द्वाग्वतीत्यभिधीयते ॥ श्रुत्वा तस्याः पवित्रांग्याः समुत्पत्तिर्निजालयात् ॥ संप्राप्ता मुन
यश्चैव देवाश्च सुमनोजवाः ॥ गन्धर्वयक्षरक्षांसि नागराजाश्च तक्षकात् ॥ दैत्याश्च दान
वाश्चैव कृतपुष्पोपहारकाः ॥ सिद्धाश्चाप्सरसश्चैव चित्रालंकारभूषणाः ॥ भूतकिन्नरयु
ष्मानि पिशाचा ये च खेचराः ॥ ततो देवो महादेवः सर्वभूतपतिः शिवः ॥ दृष्टिं विधाय दैत्ये
न्द्रे जगाद वचनं शुभम् ॥ प्रह्लाद त्वयि धर्मज्ञ सुप्रीताः पश्य देवताः ॥ दैत्यानामीदृशं पुण्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मन्येमान्तुनविद्यते ॥ममवक्त्रसमुद्भूतावाग्वती वचनात्क्षितिम् ॥अप्रवेश्यासुरैर्भयान्नप
सातवसुव्रत ॥सैवतीर्थवती श्रेष्ठालोककामफलप्रदा॥ सेव्याभवतुलोकानांममलोका
भिलाषिणाम्॥ योगीश्वरः स्वधर्मज्ञमत्प्रभावाद्भविष्यसि ॥इत्युक्त्वादेवदेवेशस्तत्रैवा
न्तर्दधेस्वयम्॥ देवदैत्यादयोन्यापिदुद्रुवुर्भवनंस्वकम् ॥प्रह्लादोपिमहाबाहुरभिप्रेतालयं
ययौ ॥ततोविभात्युज्ज्वलहेममालिनी मृगेन्द्रशैलोपरिनित्यवर्षिणी॥ समुद्रगातीर
जवृक्षपल्लवैर्विमुक्तपुष्पाकुलवीथिवाहिनी॥ ॥इतिश्रीवाग्वतीमाहात्म्यप्रशंसायां
तीर्थवर्णनेप्रह्लादतपःसिद्धिर्नामप्रथमोऽध्यायः॥ १ ॥ ॥भीष्मउवाच॥श्रुतासुपु
ण्यवाग्वत्याःसमुत्पत्तिर्महामुने ॥अनल्पफलदाश्रेष्ठासर्वपापप्रणाशिनी ॥केषुकेषु
प्रदेशेषुतीर्थंतस्याःप्रचक्षते ॥तीर्थस्यचफलंकृत्स्नंश्रोतुमिच्छाम्यहंमुने॥ ॥पुलस्त्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उवाच ॥ अथातः संप्रवक्ष्यामि मूर्द्धिन स्यैव भूभृतः ॥ महाश्मशकलाकीर्णे नानावृक्षोपशो
भिते ॥ नानाकुसुमसंकीर्णे नानाविहगसेविते ॥ नदीसलिलझंकारशब्दसंघातपूरितम् ॥
महाश्मनः प्रपतितं यत्र तीर्थोदकं शुभम् ॥ तीर्थे विष्णुपदे रम्ये विष्णुलोकफलप्रदे ॥ चतुर्वि
शतिद्वादश्यां नियमैर्यस्तु स्नायते ॥ मानुषं विभवं भुक्त्वा विष्णुलोकं स गच्छति ॥ दूरादपि वि
निर्द्दिष्टा फेनप्रस्यन्दमालिनी ॥ विष्णोः पदात्स्रवन्तीति तस्माद्विष्णुपदी स्मृता ॥ वाग्वत्या
विष्णुपद्याश्च संभवे सत्वसेविते ॥ स्नायते विधिना यस्तु सौभाग्यं लभते नरः ॥ गंगा च यमु
ना चैव तथा देवी सरस्वती ॥ तत्र गच्छति पंचम्यां तस्मात्पंचनदी स्मृता ॥ अथातः संप्रवक्ष्या
मि देशांतस्यैव भूभृतः ॥ इन्द्रमार्गमिति स्थानं तीर्थमिन्द्रेण कल्पितम् ॥ अस्मिन्तीर्थवरे पुण्ये
विधिना यस्तु स्नायते ॥ मोदते चाप्सरोभिस्तु परत्रे तीर्थगा सुकृः ॥ दिव्याप्सरोभिः संसेव्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

फेनमालिकलोज्वला ॥ इन्द्रमार्गा च्छवन्तीति इन्द्रमार्गेति विश्रुता ॥ वाग्वत्या इन्द्रमार्गायाः सं
भेद्येसत्वसेविते ॥ स्नायते विधिना यस्तु इन्द्रलोकं स गच्छति ॥ ततो मती नाम सरिद्रुद्रशिरोद्भ
वा ॥ तस्यापि प्रभवं तीर्थं प्रवक्ष्यामि प्रकामदम् ॥ मणिधातुनगोत्संगे तीर्थे मणिशिलान्त
रे ॥ स्नायते विधिना यस्तु सर्वकाममवाप्यते ॥ संभेदस्य तदभ्यासे स्रोतस्यूर्द्ध्वं विनिःसृतम् ॥
रुद्रधाराजलं नाम तीर्थमस्ति प्रकामदम् ॥ स्फटिकाख्यावलीतुल्यजलबुद्बुदमालिनम् ॥
रुद्रधारोदयं दृष्ट्वा सर्वपापैः प्रमुच्यते ॥ अस्मिंस्तीर्थवरे पुण्ये विधिना यस्तु स्नायते ॥ वि
मानेनार्कवर्णेन रुद्रलोकं स गच्छति ॥ कृष्णाष्टम्यां चतुर्दश्यां पंचदश्यां विशेषतः ॥ स्ना
तव्यं विधिना नित्यं रुद्रलोकफलार्थिना ॥ सुतो विश्रवसः श्रीमान् राक्षसोथ विभीषणः ॥
स्वपितुः शासनात्तत्र तपउग्रं चचार ह ॥ ॥ भीष्म उवाच ॥ धर्मशीलेन धीरेण पितुः शा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सनवर्तिना ॥कस्योपदेशाद्देवर्षेतपस्तस्मिंश्च चारह॥ ॥पुलस्त्य उवाच॥पुराणंकांपु
रींत्यक्त्वा धर्मशीलो विभीषणः॥गोकर्णारण्यकंरम्यं प्राप्तवान्पितुरालयम्॥प्राप्तमा
त्रस्तु धर्मज्ञो ज्वलन्तं तपसः श्रियः॥प्रणम्य पितरंमूर्ध्ना निषसाद्कुशासने॥ततश्चिन्तग
तंज्ञात्वा पुत्रस्याक्लिष्टकर्मणः॥व्याजहार शुभं वाक्यं विश्रवा मुनिपुंगवः॥ज्ञातं वै तव ध
र्मज्ञ यत्कार्यादिहागतः॥विना न तपसा पुत्र सिध्यन्ते कार्यसम्पदः॥रम्ये हिमवतः कुक्षौ
सुरसिद्धनिषेविते॥महादेवमुखोद्भूता वाग्मती सरिदुत्तमा॥रम्या मणिमती चैव चूडा
मणिसमुद्भवा॥तयोस्तु संगमाभ्यासे स्रोतस्यूर्द्ध्वविनिःसृतम्॥रुद्रधारजलं पुण्यंतीर्थ
मस्ति प्रकामदम्॥जलंपातालगंगाया रुद्रपादोर्ध्वनिःसृतम्॥पवित्रं परमं तीर्थंसर्वकाम
फलप्रदम्॥उग्रंतपस्तत्र गत्वा क्रियतां नियमेन वै॥विनिगृह्येन्द्रियग्रामं मन्त्रजापपरो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भव ॥ ततस्तस्य वचः श्रुत्वा पितुर्धर्मभृतां वरः ॥ प्रययौ जवमास्थाय हिमवन्तं विभीषणः ॥
प्राप्तमात्रेण धर्मज्ञो रुद्रधारे दयं शुभम् ॥ निमज्ज्य वाग्वती तोये चकारोग्रतरं तपः ॥ दिनान्त
रेणाकेनापि कीर्तिमान्पुत्रवत्सलः ॥ आगत्य विश्रवा पुत्रं प्रावदत्साधु साध्विति ॥ पुत्रं जल
स्थितं दृष्ट्वा वेपमानं मुहुर्मुहुः ॥ व्याजहार इदं वाक्यं विश्रवा मुनिपुंगवः ॥ एह्येहि पुत्र धर्मज्ञ
सिद्धं कार्यं त्वदीहितम् ॥ अनेन तपसा व्यक्तं लोकपालो भविष्यसि ॥ इत्युक्त्वा स्वाश्रमं
नीतः पुत्रं पुत्रवतां वरः ॥ रम्यं मुनिजनाकीर्णं नानाकुसुमपादपम् ॥ ततः स्वस्थमना
भूत्वा निवृत्तात्मप्रयोजनः ॥ रामायणं भविष्यं स श्रावयामास सादरात् ॥ कालेन महता तेन तपसा समुपार्जितम् ॥ प्रददावात्मपुत्राय गदां शत्रुनिवारिणीम् ॥ ततः पितुर्वा क्याद्विभुर्दमानसो गदां गृहीत्वा शरवारणाह्वयाम् ॥ मनोरमां काञ्चनहर्म्यमालिनीं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नाभिर्यक्षीभिरासुरीभिस्तथैवच॥देव्याः प्रसादनार्थेनसेव्यन्तेयत्रवाग्वती॥मिश्रकेशी घृता
चीचलंवुषाबुद्बुदातथा॥कुनुस्थलाचरम्भाच मेनकापुञ्जिकस्तना॥अन्याश्चाप्सरसः
सर्वाः शिवाराधनतत्पराः॥सेवन्तेक्रीडनार्थेनवाग्वतीयत्रनिर्गता॥कुम्भयोनेरगस्त्यतीर्थं
तत्रप्रकामदम्॥ह्रदोनन्तस्यनागस्यतत्रतीर्थंप्रकामदम्॥तीर्थकेरसकृज्जुष्टंप्रकामफल
दंशुभम्॥उमातीर्थमितिख्यातंतीर्थंतत्रैवदृश्यते॥अगस्त्यतीर्थमासाद्यस्नायतेयस्तुमानवः॥
मोदतेमुनिकन्याभिरगस्त्यभवनेशुभे॥अनन्तह्रदमापद्यस्नायतेयस्तुमानवः॥अनन्तभवने
रम्येमोदतेनागिनीगणैः॥उमातीर्थसमासाद्यस्नायतेयस्तुमानवः॥स्त्रीषुसौभाग्यमाप्नो
तिस्त्रीचपुंसिनसंशयः॥कृतोत्थानात्पवित्र्यांग्याः भूमिः सातिमनोरमा॥सौन्दर्येणैववा
ग्वत्याः सुन्दरीत्यभिधीयते॥अतऊर्ध्वंप्रवक्ष्यामिविमलांवुदचुंविनम्॥वाग्वतीप्रभवंपुण्यं

Sanskrit University, Balmeeki Campus, Kathmandu

पद्म·पु· भव॥ततस्तस्यवचःश्रुत्वापितुर्धर्मभृतांवरः॥प्रययौजवमास्थायहिमवन्तंविभीषणः॥
६ प्राप्तमात्रेणधर्मज्ञोरुद्रधारेदयंशुभम्॥निमज्ज्यवाग्वतीतोयेचकारोग्रतरंतपः॥दिनान्त
रेणकेनापिकीर्तिमान्पुत्रवत्सलः॥आगत्यविश्रवापुत्रंप्रावदत्साधुसाध्विति॥पुत्रंजल
स्थितंदृष्ट्वावेपमानंमुहुर्मुहुः॥व्याजहारइदंवाक्यंविश्रवामुनिपुंगवः॥एह्येहिपुत्रधर्मज्ञ
सिद्धंकार्यंत्वदीहितम्॥अनेनतपसाव्यक्तंलोकपालोभविष्यसि॥इत्युक्त्वास्वाश्रमं
नीतःपुत्रंपुत्रवतांवरः॥रम्यंमुनिजनाकीर्णंनानाकुसुमपादपम्॥ततःस्वस्थमना
भूत्वानिवृत्तात्मप्रयोजनः॥रामायणंभविष्यंसश्रावयामाससादरम्॥कालेनमह रामः
तातेनतपसासमुपार्जितम्॥प्रददावात्मपुत्रायगदांशत्रुनिवारिणीम्॥ततःपितुर्वा ६
क्याद्विबुद्धमानसोगदांगृहीत्वाशारवाररणाहूयाम्॥मनोरमांकाञ्चनहर्म्यमालिनीं

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विवेशलंकांनगरींविभीषणः ॥ ॥इतिश्रीवाग्वतीप्रशंसायांतीर्थवर्णनेविभीषणा
स्वसिद्धिर्नाम ॥२॥ ॥भीष्मउवाच ॥माहात्म्यंरुद्रधारायाः श्रुतंसर्गफलम् ॥अ
थान्यंश्रोतुमिच्छामितीर्थंकामफलप्रदम् ॥ ॥पुलस्त्यउवाच ॥अतऊर्द्ध्वंप्रवक्ष्यामि
चैलगंगासमागमम् ॥प्रकामफलदंपुण्यंतीर्थंपापप्रणाशनम् ॥विष्णोर्भगवतोभीष्म
धृतवाराहरूपिणः ॥चैलान्निपतितत्वात्तुचैलगंगेतिविश्रुता ॥वाग्वत्याश्चैलगंगायाः
संभेदेयस्तुस्नायते ॥दशगंगाजलस्नानंपुण्यंसलभतेनरः ॥अतऊर्द्ध्वंप्रवक्ष्यामिवाग्व
तीभेदपर्वतम् ॥प्रकामफलदंपुण्यंगोकर्णेनकृताश्रमम् ॥अमोघेसलिलोद्भेदेवाग्वत्या
यस्तुस्नायते ॥अमोघंव्रजतेलोकंतीर्थसेवीनरोत्तमः ॥अमोघेवाग्वतीतीरेविधिनानियमे
नवा ॥तीर्थेकृत्स्नचतुर्दश्यांवस्तव्यंतीर्थसेविना ॥एकरात्रोषितोभूत्वातत्रैवनियमेनवै ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पद्मपु० अर्चयेत्क्षेत्रजं लिंगं तीर्थसेवी प्रयत्नतः ॥ पितॄन् संतर्पयेद्यस्तु तीर्थसेवी प्रयत्नतः ॥ कुलं
७ तारयते यत्र दश पूर्वान्दशापरान् ॥ एकं यो भोजयेद्विप्रं सहस्रं भोजितं भवेत् ॥ एकां यः क
पिलां दद्याद्गोसहस्रप्रदो भवेत् ॥ देहमुत्सृजते यस्तु कन्दरायां नदीजले ॥ अप्सरोभिः सह
स्वच्छं स्वर्गलोकं स गच्छति ॥ महा — जालोचित चारुकन्दरा नदीजलास्फालनशब्दना
दिता ॥ विलोकयमानादपि तीर्थसत्तमाद्विमुक्तपापो भवतीह तीर्थिकः ॥ ॥ इति श्रीवा
ग्वतीप्रशंसायां तीर्थवर्णनो नाम ॥ ३ ॥ ॥ पुलस्त्य उवाच ॥ अत ऊर्ध्वं प्रवक्ष्यामि रम०
वाग्मतीद्वारमुत्तमम् ॥ महानागालयं रम्यं महाश्मशाकनालयम् ॥ नानावृक्षलता ७
कीर्णं नानापुष्पोपशोभितम् ॥ नानाविहगसंघुष्टं नानाषट्पदनादितम् ॥ सरित्स
लिलझंकारशब्दसंघातभीषणम् ॥ क्रीडास्थानं महागौर्या महातीर्थफलप्रदम् ॥ नागाङ्क

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नाभिर्यक्षीभिरासुरीभिस्तथैवच॥देव्याः प्रसादनार्थेनसेव्यतेयत्रवाग्वती॥मिश्रकेशीघृता
चीचलंवुषावुद्बुदातथा॥कृतुस्थलाचरम्भाचमेनकापुञ्जिकस्तला॥अन्याश्चाप्सरसः
सर्वाःशिवाराधनतत्पराः॥सेवन्तेक्रीडनार्थेनवाग्वतीयत्रनिर्गता॥कुम्भयोनेरगस्त्यतीर्थं
तत्रप्रकामदम्॥ह्रदोनन्तस्यनागस्यतत्रतीर्थंप्रकामदम्॥तीर्थंकेरसकृज्जुष्टंप्रकामफल
दंशुभम्॥उमातीर्थमितिख्यातंतीर्थंतत्रैवदृश्यते॥अगस्त्यतीर्थमासाद्यस्नायतेयस्तुमानवः॥
मोदतेमुनिकन्याभिरगस्त्यभवनेशुभे॥अनन्तह्रदमापद्यस्नायतेयस्तुमानवः॥अनन्तभवने
रम्येमोदतेनागिनीगणैः॥उमातीर्थसमासाद्यस्नायतेयस्तुमानवः॥स्त्रीषुसौभाग्यमाप्नो
तिस्त्रीचपुंसिनरांसयः॥कृतोत्थानात्पवित्र्यांग्याःभूमिःसातिमनोरमा॥सौन्दर्यैरौववा
ग्वत्याःसुन्दरीत्यभिधीयते॥अतऊर्ध्वंप्रवक्ष्यामिविमलांवुदवुंदितम्॥वाग्वतीप्रभवंपुण्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सुरासुरनिषेवितम् ॥देवदानवगन्धर्वयक्षराक्षससाधुभिः ॥उपस्पृश्यजलेपुण्येरुद्रलोक
फलार्थिभिः ॥वाग्वतीप्रभवेतीर्थेस्नायतेयस्तुमानवः ॥कांचनेनविमानेनरुद्रलोकंसगच्छ
ति ॥महामृगाऽप्यासितशृंगशालिनः प्ररुह्यमानादपिपर्वतोन्नमात् ॥विमुक्तपापा – – –
– – – – कृत्वाभिषेकात्किमुवाग्वतीजलात् ॥ ॥इतिश्रीवाग्वतीमाहात्म्यप्रशंसा
यांतीर्थवर्णनंनाम ॥४॥ ॥पुलस्त्यउवाच ॥वर्णधर्मेषुसत्वेष्वआद्रिकेषुच ॥नाख्या
तव्यमिदंपुण्यंपुराणंपापवृद्धिषु ॥ब्राह्मणस्यचवैश्यस्यक्षत्रियस्यतथैवच ॥वर्णोत्कर्षस्य
वैश्यस्यक्षत्रियस्यतथैवच ॥वर्णोत्कर्षस्यशूद्रस्यतीर्थयात्राप्रवक्ष्यते ॥तस्मात्सहकृत्सुय

त्नेनव्याख्यातव्यंशुभार्थिना ॥ब्राह्मणेषुविशेषेणपुराणंपुण्यवर्धनम् ॥ ॥इतिश्रीती
र्थयात्राखण्डःसमाप्तः ॥ ॥भीष्मउवाच ॥रम्येगंगातटेपुण्येभीष्मःशान्तनुनन्दनः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तीर्थयात्राप्रवक्तारं पुलस्त्यंमुनिमब्रवीत् ॥ श्रुतंतत्वफलोद्भूतं तीर्थस्यगुणविस्तरम् ॥ पुनः
कौतूहलंकिंचिन्ममचेतसिवर्तते ॥ वाग्वतीप्रभवेस्थानेतीर्थानांप्रवरेशुभे ॥ तस्मिन्नपिमहा
प्राज्ञतपःकेनकृतंपुरा ॥ एवंपृष्टोमहाप्राज्ञोगंगापुत्रेणधीमता ॥ व्याजहारशुभंवाक्यंपुल
स्त्योमुनिसत्तमः ॥ अस्मिन्तीर्थेतपःकृत्वा राजपुत्रीप्रभावती ॥ उमायावरदानेनप्रद्युम्नमल
भत्पतिम् ॥ ॥ भीष्मउवाच ॥ प्रभावतीतिविख्याताकस्यराज्ञःकुलोद्भवा ॥ कस्यापदेशा
द्देवर्षेतपस्तास्मिंश्चचारह ॥ ॥ पुलस्त्यउवाच ॥ तीरमादायगंडक्यायावत्तंवाग्वतीतटम् ॥
पूर्वपश्चात्ततस्याद्रेरधस्ताचन्दनागिरेः ॥ सुप्रभानामविख्याता पुरीस्वर्गपुरोपमा ॥ त
स्यामधिपतिःश्रीमान्महेन्द्रदमनोनृपः ॥ रूपलक्षणसम्पन्नाजीवादपिगरीयसी ॥ देवी
प्रभावतीनामभगिनीतस्यभूपतेः ॥ सखीभिरसकृद्यत्नैर्वरार्थंप्रतिबोधिता ॥ पतिंनकांक्षते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

साहिदैत्यदानवयोःकुले ॥अनिच्छन्तीं समुत्पेत्य भगिनीं दैत्यसत्तमः॥ वाग्वती चहृदी भूता
कमलोत्पलभूषिता ॥क्रीडार्थं निर्ममे देव्या भगिन्याः समहीपतिः॥ तस्य राज्ञः प्रतापेन रक्षि
तावरसुन्दरी॥ नशाक्यते वज्ञान्नेतुं कैश्चिदप्यमरारिभिः॥ अतो निर्भर संचारा राजपुत्री प्रभावती
तपोयोगरतानित्यं रूपातिशयशालिनी॥ नानारत्नालये रम्ये महेन्द्रदमनालये॥ क्रीडोद्यानेषु
चित्रेषु चित्रपुष्पाकुलेषु च॥ तोयावगाढे वाग्वत्याः कमलोत्पलभूषिते॥ रम्येषु नगगात्रेषु
कन्दरेषु नदीषु च॥ मोहयन्ती मनोयूनां रूपेणाप्रमितेन वै॥ सखीभिः सहसादेवी रराम रुचिरान
ना॥ नियमैरुपचारैश्च द्योभिषेकैश्च संयुतम्॥ पूजाभिश्च विचित्राभिर्विधानैरपरैरपि॥ तपो
योगरता साहि महर्षेर्वचनेन वै॥ उमामाराधयामास वाग्वती प्रभवे शुभे॥ ततः कालेन दी
र्घेण वरदानार्थमागताम्॥ योगेश्वरीमुमां देवीं दर्शयामास सुन्दरी॥ दृष्टमात्रेण सा देवीं प्रण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्याविनयेनवै ॥ स्तुत्वास्तुतिशतैः पुण्यैरिदंवचनमब्रवीत् ॥ पुण्येनमहतादेविदृष्टंत्वत्पादपंक
जम् ॥ तपसःसिद्धिरभवन्निश्चयंममकांक्षितम् ॥ तस्यास्तद्वचनंश्रुत्वा वरदापर्वतात्मजा ॥
अब्रवीदीदृशंवाक्यंप्रहर्षोत्फुल्ललोचना ॥ एवमेवेतिसुश्रोणिनिश्चयंममदर्शनात् ॥ सिद्ध्यते
कांक्षितंवस्तुपुण्यंवापिप्रवर्धते ॥ आगमिष्यतितत्रैवप्रद्युम्नोरूपिणांवरः ॥ भविष्यतिविवाह
स्तुसहतेनवरानने ॥ त्वंप्रवेक्ष्यसिहेभद्रेद्वारकांचमनोरमाम् ॥ इत्युक्त्वाहिमवत्कन्यातत्रैवा
न्तरधीयत ॥ ततःप्रहृष्टादितिजेन्द्रकन्यातपःश्रमाक्लान्तविलोचनोत्पला ॥ प्रभावतीपं
कजगर्भकोमलाविनिर्ययौस्वंभवनंमनोरमम् ॥ ॥ इतिश्रीवाग्वतीमाहात्म्यप्रशंसायां
प्रद्युम्नविजयेगौरीवरप्रदानोनाम ॥ ५ ॥ ॥ पुलस्त्यउवाच ॥ ततोदेव्याःप्रभावेणप्रद्यु
म्नोरुक्मिणीसुतः ॥ प्र[illegible]म्यपितरंमूर्ध्नाइदंवचनमब्रवीत् ॥ ॥ प्रद्युम्नउवाच ॥ भगव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रद्यु॰पु॰ नेतुमिच्छामितीर्थयात्रां यदृच्छया ॥ शंबरस्यवधोद्भूतं पाप्मानंमोक्षुमर्हसि ॥ इत्युक्त

१० माचेणातदाप्रद्युम्नेनमहात्मना ॥ व्याजहारशुभंवाक्यंभगवान्रुक्मिणीपतिः ॥ ॥श्रीकृ

ष्णउवाच ॥ नेष्यामिपुत्रहेवीरतीर्थयात्रा यदृच्छया ॥ यात्रोत्सवरतानांहि कालोरम्यः प्रवर्त्त

ते ॥ पद्मपद्मोत्पलैः कांशैः पूर्यतेदीर्घकालजम् ॥ प्रसन्नसलिलाजाताः सर्वाश्चैवसमुद्रगाः ॥

दृश्यतेधरणीरम्याहंसमालामलांशुका ॥ नीलमेघविनिर्मुक्तनिर्मलाश्चदिशोदश ॥ ॥

पुलस्त्यउवाच ॥ इत्युक्त्वाभगवान्विष्णुः शंखचक्रगदाधरः ॥ आरुरोहगरुत्मन्तं प्रद्युम्नेनर

थोत्तमम् ॥ तत्क्षणाद्देवदेवेशः सपुत्रोगरुडध्वजः ॥ तीर्थयात्राटनार्थेनद्वारकामजहत्पुरीम् ॥ दे स्मः

विकाप्रभवंचैव वितस्थिप्रभवंतथा ॥ सिन्धोस्तुप्रभवंचैव वंशानदुप्रभवंतथा ॥ प्रभवंतुसरस्व १०

त्यायमुनाप्रभवंतथा ॥ प्रभवंचैवगंगस्यागोमतीप्रभवंतथा ॥ शारयृप्रभवंचैवगंडकीप्रभ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इतिश्रीवाग्वतीमाहात्म्यप्रशंसायांप्रद्युम्नविजयेमहर्षिसंदर्शनोनाम ॥६॥ ॥
पुलस्त्यउवाच ॥ ततःप्रहृष्टहृदयोनारदोमुनिसत्तमः ॥ प्रभावतींपुरोधाय प्रद्युम्नमिदम
ब्रवीत् ॥ मधुरुत्वंपूर्वदेहेनकामश्चैवत्वमेवहि ॥ यामाधवीमथोभार्यासैषादेवीप्रभावती ॥
अस्माद्विकल्पमुत्सृज्यप्रतिगृह्णीष्वमानद ॥ मत्प्रदत्तांविशेषेणवाराराजसुतामिमाम् ॥
त्वंचरूपवतांश्रेष्ठोरूपाढ्याचप्रभावती ॥ ममाज्ञयाविवाहश्चकर्तव्यःसद्यएवहि ॥ इत्युक्त्वा
कृतमांगल्योहर्षोत्फुल्लविलोचनः ॥ नारदोभगवान्वाक्यमब्रवीदीदृशंपुनः ॥ अद्येकांरज
नीमत्रकर्तव्यंवसतिंत्वया ॥ गन्तव्यंरथमारुह्यसुप्रभातेस्वमालयम् ॥ पूर्णचन्द्रानना
रम्याकुमुदामोदशालिनी ॥ समागतानिशाश्चैवसुरतोत्सुककारिणी ॥ नविद्यतेभय
श्चात्रनिश्चयंममचेतसा ॥ इत्युक्तोनारदोधीमान्स्वेच्छयाक्वापिनिर्ययौ ॥ ततोप्सरो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भिरलङ्कृते विनेक्रीडय शुभे ॥ विचित्रतरुखंडाद्ये चित्रपुष्पलतागृहे ॥ विकसत्कुसुमा
कीर्णे निरुद्धे भ्रमराकुले ॥ विघुष्टकिन्नरोद्गीते विलसन्मृगसेविते ॥ अंके निधाय सुश्रो
णीं लज्जमानां प्रभावतीम् ॥ ततः शैलसुखासीनः प्रद्युम्नो वाक्यमब्रवीत् ॥ पश्य त्वं वक्त्र
पूर्णेन्दुकान्त्या वीजितमंभसि ॥ संकोचं याति कमलं भद्रे चन्द्रांशुशंकया ॥ वाग्वत्या विम
लेनो येर्विरुतैर्जलपक्षिणाम् ॥ पिशुनं क्रियते देवि तव नूपुरनिःस्वने ॥ ज्योत्स्नाभिर्विमलैः
पुण्यैरभिषिञ्चन्महीधरम् ॥ विभाति भगवांश्चन्द्रो यामिनीतिलकोपमः ॥ किञ्जल्कपिलांगा
नां षट्पदानां वरानने ॥ समुच्चरन्ती हुंकारा विबुद्धे कुमुदोदरे ॥ क्षिप्तपुष्परजो भस्त्र वाग्वतीजल
वासकः ॥ प्रवाति पवनो देवि मन्दमंगसुखप्रदः ॥ मन्द्रतारलयोपेतं मन्मथोमोहकारिणाम् ॥ उ
द्गीतं किन्नराणां च श्रूयते सुभगध्वनिः ॥ इत्युक्त्वा रूपिणां श्रेष्ठः प्रद्युम्नः प्रियया सह ॥ रम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वंतथा॥सप्तनीतिद्दृदं चैव कौशिकी प्रभवं शुभम्॥अनेकानि परिभ्राम्य तीर्थान्यन्यानि चै
वहि॥वाग्वती प्रभवं प्राप्तः सपुत्रो भगवान्हरिः॥ततः सप्राप्तमात्रेण नारदो मुनिसत्तमः॥
स्तुत्वास्तुतिशतैः पुण्यैरिदं वचनमब्रवीत्॥भगवन्पुण्डरीकाक्ष सूर्यकेतुर्नराधिपः॥चिरका
लोषितस्तत्र श्वेतकापुरिकांक्षया॥सा राजदुहिता देवी प्रद्युम्नाय प्रकल्पिता॥नाम्ना चन्द्र
वती ख्याता चन्द्रबिंबनिभानना॥तां हर्तुमीहते देवीं महेन्द्रदमनोऽसुरः॥सं मोहादेव दुर्बुद्धि
रप्रदाता महीपतेः॥अतः पूर्णेन्दुवदना नीलोत्पलदलेक्षणा॥रूपातिशय देवी विवाहः
क्रियतां विभो॥दीर्घकालं निरुध्वा च सा चन्द्रा गिरिमालया॥वाग्मती च सरिच्छ्रेष्ठा गंगां
द्रष्टुं समीहते॥पुनः प्रभावती नाम राजपुत्री यशस्विनी॥प्रद्युम्नं रूपिणं श्रेष्ठं कांक्षते तप
मासकृत्॥अतो द्विशिखरे रम्ये प्रद्युम्नेन महात्मना॥अथैकां रजनी मत्र वास्तव्यं मम मज्ञा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सनात् ॥ ततः श्रुत्वा मुनेर्वाक्यं भगवान्मधुसूदनः ॥ अब्रवीदीदृशं वाक्यं विस्मयोत्फुल्ललो
पद्म.पु. चनः ॥ सम्बन्धित्वं नरपतेः सूर्यकेतोर्विशेषतः ॥ कथं नेच्छामि देवर्षे अभिप्रेतं त्वया पुनः ॥
११ अनिहत्य दुरात्मानं शङ्क शत्रुं सुदुर्जयम् ॥ चन्द्रावत्या विवाहस्तु सद्यः किन्तु न शोभते ॥ हन्तुं
चन्द्रवतीं मोहाद्दीहितस्य दुरात्मनः ॥ भविष्यति वधस्तस्य प्रद्युम्नेन महात्मना ॥ अहमप्याग
मिष्यामि तदेवावसरे शुभे ॥ तदा मोक्ष्यामि देवर्षे भित्त्वा शैलं सरिद्वराम् ॥ तस्मिन्नेव सरे पुण्ये
देवकंटकवर्जिते ॥ चन्द्रावत्या विवाहश्च भविष्यति ममाज्ञया ॥ दृष्टमात्रे विवाहे च चन्द्राव
त्यास्तदेवहि ॥ राजर्षेः सूर्यकेतोस्तु गन्तव्यः श्वेतकापुरम् ॥ अद्यैका रजनीमत्र स्थेयास्मिन्शै राम:
लमूर्द्धनि ॥ प्रद्युम्नेन च वस्तव्यं महर्षे वचनात्तव ॥ इतीरयित्वा वचनं यथेप्सितां दिशं सर ११
च्छुभ्रवलाहकाकुलाम् ॥ सुवर्णशैलाभ्रसमानरूपिणं खगेन्द्रमारुह्य विनिर्ययौ हरिः ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुलस्त्य उवाच ॥ ततः प्रहृष्टहृदयः सुप्रभाभवनं शुभम् ॥ प्रविवेशासुरैः पूर्णं नारदो मुनिसत्तमः ॥
प्रविष्टे तु तदा तत्र ज्वलन्तमिव तेजसा ॥ रत्नाभरणसंभूतं प्रभापल्लवितश्रियम् ॥ चक्रचामरशं
खाब्जश्रीवत्सांकुशलक्षणैः ॥ अलंकृतकराग्रेणाशोभितं शुभकारिणम् ॥ रक्तपद्मदल
ज्वलत्लोलविलोचनम् ॥ आवासं शानद — — भिन्नवैडूर्यसंप्रभम् ॥ अनेकासुरसंकीर्णं सभा
लंकारसन्निभम् ॥ माणिक्यशाकलाकीर्णं हेमासनवरस्थितम् ॥ राजलीलासुरवांभोभिरि
मं चवरविग्रहम् ॥ ददर्श नारदः श्रीमान् राजानं शक्रतापनम् ॥ ततो दत्तवराशी
महामुनिः ॥ निषशादासने वरे कल्पिते हेमनिर्मिते ॥ कौतूहलपरो भूत्वा दृष्ट्वा यान्तं महामुनि
म् ॥ अब्रवीदीदृशं वाक्यं श्रीमान् सुरसत्तमः ॥ आयातो व्योममार्गेण मेरुशृंगाग्रसन्निभः ॥
तस्य मूर्ध्नि समाविष्ट इन्द्रनीलसमप्रभः ॥ तदा — णसमोपेतं बालादित्यसमप्रभम् ॥ चर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्विरवुरैर्ईदृशं ममद्यासनवासिभिः॥सव्यक्तं नावगच्छामि किमिदं तपसां निधे ॥ज्ञानात्व
मसि सर्वेषां कार्याणां मुनिसत्तम॥ततस्तस्य वचः श्रुत्वा दैत्येन्द्रस्य महामुनिः॥व्याजहा
र शुभं वाक्यं नारदो मुनिसत्तमः॥यदि कौतूहलं राजन् विद्यते तव संप्रतम्।श्रावयिष्याम्य
हं क्षिप्रं दृष्टं चैव च चक्षुषा॥आयातो व्योममार्गेण वारवतीप्रभवं गिरिम्॥मेरुशृंगाग्रसंका
शो गरुत्मानिति विश्रुतः॥तस्य मूर्ध्नि समाविष्ट इन्द्रनीलसमप्रभः॥यदुवंशपतिः श्रीमान्
विष्णुरित्यभिधीयते॥तदग्रेण समायातो बालादित्यसमप्रभः॥रुक्मिणीतनयो वीरः प्रद्यु
म्न इति कीर्त्यते॥तीर्थयात्रोपदेशेन प्रागतो रुक्मिणीसुतः॥चकार हरणं देव्याः प्रभावत्या
यदृच्छया॥तस्य तद्वचनं श्रुत्वा महर्षेरमितौजसः॥अब्रवीदीदृशं वाक्यं श्रीमानसुरसत्तमः॥
मुने न विदितः पूर्वं प्रागतो विष्णुरित्ययम्॥यदि जानाम्यहं व्यक्तं सपुत्रं तं त्यजामि तम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रजनीमेकांरम्येस्मिन्शैलमूर्धनि ॥ ततःप्रभातमुत्थायराजपुत्रीप्रभावती ॥ विनयेनाञ्जलिं
कृत्वाप्रद्युम्नमिदमब्रवीत् ॥ महेन्द्रदमनोनामभ्राताममदुरासदः ॥ शंबरस्यवधंश्रुत्वासततं
त्वयिकुप्यति ॥ महर्षेर्वचनंचैवस्मर्तव्यंरूपिणांवर ॥ अस्मिन्हिरम्येशैलेन्द्रेनचिरंस्थातुमर्हसि ॥
सखींचन्द्रवतींचैवनित्यंतवहितैषिणी ॥ विश्वासंस्थाप्यतांयत्नात्वाग्वतीसलिलेशुभे ॥ व
चनानन्तरेदेव्याःप्रद्युम्नोरूपिणांवरः ॥ संपूज्यवाग्वतींयत्नादिदंवचनमब्रवीत् ॥ रुद्रवक्त्रवि
निर्भूतेरुद्रलोकफलप्रदे ॥ दैत्येन्द्रपुण्यकेतोस्तुपताकांशुकसन्निभे ॥ आसुरीभिश्चयक्षी
भिरप्सरोभिस्तथैवच ॥ उपस्पृष्टजलेपुण्येप्रकामफलदायिके ॥ मृगेन्द्रशिखरोत्संगंप्राव
यन्तीशुभोदकैः ॥ सुरोपनीतमन्दाररजोरञ्जितवीचिभिः ॥ रक्षतांनिम्नगाश्रेष्ठेसूर्यकेतोःसु
तामिमाम् ॥ यथाननीयतेतेनमहेन्द्रदमनेनसा ॥ इत्युक्त्वावाग्वतीतोयेविक्षिप्यवरसुन्दरीम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पशु·पु· आरुरोहरथंचित्रंकामगंमकरध्वजः॥ततःस्वच्छोदकापूर्णांसरिद्भाशिविराजिते॥प्रसन्न
१३ भ्रमरालीनांविबुद्धकमलाननाम्॥प्रोत्फुल्लकुसुमाकीर्णांपर्वतोद्यानकंचुकाम्॥सारदिन्दुक
रापाण्डुंराजहंससमुत्सुकाम्॥विलोक्यधरणींदेवीमुत्तमामिवकामिनीम्॥प्रयातोरुक्मिणी
मृतुरिदंवचनमब्रवीत्॥उन्नतंपश्यसुश्रोणीदानवानांपुरोत्तमम्॥मयाविनिहतोयत्रसमरेका
लशांवरः॥रुद्रश्चिच्छेदतत्रैवब्रह्मणःपंचमंशिरः॥रुधिरंपश्यसुश्रोणिकाश्मीरकुंकुमाकरम्॥
पश्यपंकजगर्भाभंविमलंसिन्धुसंज्ञकम्॥पूर्णेन्दुवदनेपश्यपश्चाद्देशंपृथक्पृथक्॥शंखशु रामः
भ्रसमुद्रोर्मिमालावसनशालिनीम्॥पश्यपीनोन्नतकुचेद्वारकांनगरींमम॥ततोविवेशानम १३
पुरींमनोरमांमनोरमामोहविधायिविग्रहः॥पुरांगनालोचनलोलषट्पदैर्निपीतवक्त्राम्बुरुहो
जनार्दनः॥ ॥इतिश्रीवाग्वतीमाहात्म्यप्रशंसायांप्रद्युम्नविजयेप्रभावतीविवाहोनाम७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

इत्युक्तवतिदैत्येन्द्रेविहस्यासुरसंसदि॥नारदोभगवान्वाक्यमब्रवीदीदृशंपुनः॥नाधिक्षेप
स्त्वया——विष्णोरमिततेजसः॥दंष्ट्रारत्नंमहारत्नंविद्यतेयस्यवेश्मनि॥पुरामहावराहस्य
दंष्ट्रयानिर्मितंसुरैः॥कदाचित्तेनवैलब्धंरत्नंसूर्यसमप्रभम्॥दिवारक्षितमर्केणरजन्या
ममृतांशुना॥दिवानिशश्चयत्नेनयादवैःपरिरक्षितम्॥नवादिता—भावंनित्यमेवप्रपूजि
तम्॥रत्नमस्तिमहाबाहोकामदंलोकदुर्लभम्॥प्रभावात्तस्यद्विगुणीभूतविक्रमम्॥विष्णुं
जेतुंमहाबाहोनतस्यशक्तिःप्रवर्तते॥हरणेनप्रभावस्याःशंवरस्यवधेनवा॥यदिकोपोस्तिदैत्येन्द्र
ह्रियतांरत्नमुत्तमम्॥नवैकस्यतुयऊम्यमगम्यमपरैर्नृपैः॥रत्नस्याहरणादन्यत्किमस्तिपृथि
वीपते॥एवंसंभाष्यदैत्येन्द्रंज्वलत्कोपानलाकुलम्॥निष्क्रम्यभगवान्क्वापिनिर्ययौसमहामु
निः॥गतेथनारदेराजारत्नाहरणहेतुना॥राहुरगादित्यचन्द्रस्यग्रहणंसंप्रतीक्षते॥एकदातु

पद्म·पु· दिनेरम्येदृष्ट्वासंकेतमात्मनः॥ज्वलदाताम्रनयनोभ्रुकुटीकुटिलाननः॥सन्नद्धोबद्धकवचीख
१५ ड्गबाणधनुर्धरः॥सिंहाक्रान्तमहोरस्कोबलसौर्यसमन्वितः॥वायुवेगंसमासाद्यसोसुरःक्रोध
मूर्छितः॥जगामद्वारकांरम्यांरत्नाहरणहेतुना॥त्वरेणासाद्यतंदेशंरत्नाहरणलालसः॥हरणोपा
यमालोच्यतस्थावसुरसत्तमः॥ततोनिद्रावशगतेजनेपुरनिवासिनी॥प्रद्युम्नेविभवासक्तेप्रभा
वत्यासहैवतु॥मंत्रजापपरेभूत्वास्थितेचमधुसूदने॥राहुणाशशिनिग्रस्तेनिसर्गविमलेनिशि॥
प्रद्युम्नरूपमास्थायसत्वरोःसुरसत्तमः॥प्रविवेशमहावाहुरत्नागारंमनोरमम्॥निवारितोपिय
त्नेनसर्वैरत्नप्रपालकैः॥त्वरेणरत्नमादायनिर्ययौसतदालयात्॥अथहृष्टमनाभूत्वालब्धरत्नो राम:
महाजवः॥क्रमेणहिमवत्कुंजेप्राप्तवानसुराधिपः॥ततोविनिक्षिप्यसकन्दरुपासुरोप्रकामदं १५
रत्नमनल्पदीपितः॥विवेशरम्यंभवनंमहासुरोविचित्ररत्नांकुररश्मिराजितम्॥ ॥इतिश्री

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वाग्वतीमाहात्म्यप्रशंसायां प्रद्युम्नविजये रत्नापहारो नाम ॥ ८ ॥ पुलस्त्य उवाच ॥ ॥
ततो मुमोच शशिनं ग्रसन्तं सिंहिकात्मजं ॥ जगाम रजनी चैव क्षयं चन्द्रांशुना सह ॥ निद्रासुखवि
निर्मुक्ता बभूवुः पुरवासिनः ॥ रराज भगवान्सूर्यः कमलोत्पलहासनः ॥ ततः प्रभातसमये भगवा
न्मधुसूदनः ॥ द्वार्गरत्नस्य पूजार्थं प्रविवेश तदालयम् ॥ प्रवेशानन्तरं शौरिर्विनिष्क्रम्य तदालयात्
पप्रच्छ स महाबाहुस्तत्रस्थान् रत्नपालकान् ॥ वाक्यं भगवतः श्रुत्वा प्रणामाञ्जलिपाणयः ॥ इ
दं वचनं प्राहुस्तत्रस्था रत्नपालकाः ॥ एकेनागत्य शर्वर्यां प्रगाढायां चतुर्भुज ॥ प्रविष्टं तव पुत्रे
ण प्रद्युम्नेन तदालयम् ॥ एवमुक्तवतां तेषां श्रुत्वा वाक्यमसंशयः ॥ प्रद्युम्नं त्वरमाभ्यस पप्रच्छ
भगवान्हरिः ॥ पुत्रस्य वचनं श्रुत्वा पृच्छमानस्य यत्नतः ॥ मुहूर्तं ध्यानमास्थाय भगवानिदमब्रवी
त् ॥ ज्ञातोस्मि पुत्र हे वीर दुष्टं रत्नापहारिणम् ॥ रूपं तव समास्थाय हतो देवेन्द्रतापनः ॥ हत्वा दैत्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दुरात्मानं द्वारकारत्नप्रहारिणम् ॥ प्रणीयं त्वया पुत्र देवेन्द्रस्य मनोरथम् ॥ अस्माइन्तव्य हे
पुत्र जयार्थे नात्मना त्वया ॥ वधूं प्रभावती चैव नेष्यसि प्रियकारिणीम् । अहमप्यागमिष्यामि
दर्शनं निधनं रिपोः ॥ गंगादर्शनकांक्षिण्या बाणवत्याश्च प्रमोक्षणात् ॥ तवैव हि जयो नित्यं
देवा ज्ञोवधार्यते ॥ पूजार्थी त्रिदशैः सार्द्धं सच्चव्यक्तं सनेष्यति ॥ इत्युक्त्वा भगवान्विष्णुर्देव
कार्यस्थितिरतम् ॥ विस्मयोत्फुल्लवदनं पार्श्वस्थं मुनिमब्रवीत् ॥ ॥ श्रीकृष्ण उवाच ॥ गच्छ
मद्वचनाद्ब्रूहि सहस्राक्षं महामुने ॥ दैत्येन्द्रनिधनं द्रष्टुमायातव्यमिति निश्चयम् ॥ तस्य वा
क्यावसाने तु पितुर्मकरकेतुनः ॥ प्रणम्य शिरसा पादावारुरोह रथोत्तमम् ॥ ततो वरूथा
रूढः खड्गबाणधनुर्धरः ॥ ---- प्रपूजितः ॥ प्रयातो रथवर्येण
कामगेन यदृच्छया ॥ प्रहृष्टपीवरोरस्कः प्रियालिंगनलालिनः ॥ विलोक्य धरणीं रम्यां स

16

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धिः॥तस्यतद्वचनंश्रुत्वाविस्मयोत्फुल्ललोचनः॥मनोमोहपरोराजा भगिनीमिदमब्रवीत्॥यथा
चानन्यहृदयंचन्द्रवत्याः प्रजायते॥तथाविधायमेपुत्रिनिशामेकांप्रयत्नतः॥श्वः समागत्य
विधिनासंप्रार्थ्यपितरंस्वयम्॥वनयिष्यामिसुश्रोणिविवाहेवरसुन्दरि॥इत्युक्त्वास्वगतंधैर्य
मवलंव्यमहासुरः॥निर्ययौस्वविलंरम्यंरत्नरश्मिप्रदीपितम्॥गतमिन्द्रपुरंदृष्ट्वा प्रद्युम्नोवि रिं
गतज्वरे॥ययौसंध्येययासार्द्धंरन्तुमस्तान्तरंविः॥विहायधरणींतापश्चचक्रवाकमनोययौ॥
वभूवकुंकुमाताम्रंवारुणंगगनस्थलम्॥कामलाकुमुदारम्यंनिर्ययौवलसंहतिः॥रुरोध
जगदालोकंतिमिरश्चतदाघनैः॥वभूवुर्निर्दयाग्रस्ताः प्राणि⋯ निवासिनः॥रराजभगवांश्च
न्द्रः प्रदीप्तधरणीधरः॥ततोगमय्यमार्गप्यराजपुत्रींप्रभावतीम्॥प्रद्युम्नोरूपिणांश्रेष्ठइदं
वचनमब्रवीत्॥कान्तिमान्नयनानन्दजननोमनमोहनः॥प्रयातिपश्यपूर्णोत्सुत्स्वव्रक्रस्यो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प. पु. पमाप्रिये ॥ संफुल्लनेत्रनिकरं विहायकमलोत्पलम् ॥ प्रयाति मधुलिट्‌ क्वापि विकसत्कुसु
१९ मोदरम् ॥ भृंगराजभराभुग्नकेशरं कुमुदं प्रिये ॥ पीताधरमिवाभाति रम्यं ते कामिनीमुखम् ॥ म
न्दमारुतविक्षेपैः प्रवलाङ्गैः सुकोमलैः ॥ पल्लवांजलिभिः पुष्पं क्षिपन्ति तरवः प्रिये ॥ स्मित
पुष्पोद्गमोपेतं रुचिराधरपल्लवम् ॥ भ्रूलतानृत्यललितं मुद्यानमिव त्वन्मुखम् ॥ इत्युक्त्वा
प्रियवाक्येन प्रियाप्रेमप्रवर्तकः ॥ रराम रुक्मिणीसूनु रम्ये गिरिवरे तदा ॥ ततः सु— त्पद्मप
मनुरागपिंजरा तरंगमालारुचिरा सुकाञ्चना ॥ प्रभावती सकलप्रलापिनी सरोरुहि राम:
॥ ॥ इति श्री वाग्वतीमाहात्म्ये प्रशंसायां प्रद्युम्नविजये प्रभावतीविनो १९
दो नाम ॥ १० ॥ ॥ पुलस्त्य उवाच ॥ ततो विकर्षोऽशाशिनि प्रवाति मलयानिले ॥ संप्राप्तं
नारदं दृष्ट्वा प्रद्युम्नो वाक्यमब्रवीत् ॥ कथं जेयः स देवषे दानवेन्द्रः सुदुर्जयः ॥ अव्यक्तबालभा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यते द्विजयंतव ॥ भगिन्याहरणे नूनमागतं परिशंकितम् ॥ शारचापान्समुद्यम्य धूमकेतुः प्रती
क्षते ॥ तस्यास्तद्वचनं श्रुत्वा वाग्वत्या वलिनां वरः ॥ प्रद्युम्नो रुक्मिणीसूनुरिदं वचनमब्रवीत् ॥
द्वार्त्ध्वरत्नापहरणं यः करोति सुदुष्करम् ॥ हरणे चन्द्रवत्याश्च येन बुद्धिर्निवेशिता ॥ भविष्यति
वधस्तस्य निश्चयं मम बाहुना ॥ तथापि द्रष्टुमिच्छामि रिपोः रूपं दुरात्मनः ॥ तस्य तद्वचनं श्रुत्वा
प्रभावतीऽद्भुतमानसा ॥ सा विग्रहवती देवी वाग्वती वाक्यमब्रवीत् ॥ सति एवं महावाहो निश्चयं श
त्रुतापनः ॥ द्रष्टुं चन्द्रवतीं मोहोत्क्रान्तकौतुहलाकुलः ॥ ततस्तस्मिन्क्षणे पुण्ये किरातुरमान
सः ॥ निर्ययौ स्वविलाद्रम्यान्महेन्द्रदमनो नृपः ॥ दैत्येन्द्रमागतं दृष्ट्वा विरहातुरमानसम् ॥ कृ
त्वा चन्द्रवती रूपं तस्थौ मकरकेतनः ॥ ततः प्रभावती देवी समुत्थाय ससंभ्रमात् ॥ विनयेना
ञ्जलिं कृत्वा दैत्येन्द्रमिदमब्रवीत् ॥ सखी चन्द्रवती चैव तद्गुणौघैर्विमोहिता ॥ प्रणामं कु

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दृष्टेनाथलज्जयाव्यथितेन्द्रिया ॥ ततोभ्रूचापनिर्मुक्तैरपांगेषुभिरुच्चकैः ॥ विभेदहृदयंत
स्यप्रद्युम्नः कामरूपधृक् ॥ दृष्ट्वा चन्द्रवतीं देवीं सानुरागानुवर्तिनीम् ॥ प्रफुल्लनयनो राजा
ईदृशं वाक्यमब्रवीत् ॥ पतिं मां प्राप्य सुश्रोणि त्रैलोक्याधिपतिं स्वयम् ॥ भोज्यसे विपुलान्
भोगान्मया मर्त्येपि दुर्लभम् ॥ एह्येह्युत्पलपत्राक्षि क्रीडार्थं बहुभिर्गुणैः ॥ सुप्रभा भवनं रम्यं
गन्तव्यं स्वर्गसन्निभम् ॥ मम कान्ताशतं धुत्वा भीता माभूद्वरानने ॥ त्वां विमुच्य न चान्या
सां मुखं पश्यामि सुन्दरि ॥ इत्युक्तवति दैत्येन्द्रे कन्यारूपी सकेशवः ॥ अब्रवीदीदृशं वाक्यं
मन्तर्हासस्मिताननः ॥ तद्वाक्यमीदृशं पुण्यं यदि सत्यं नराधिप ॥ कथं नेच्छामि पत्नीत्वं
राजभोगश्च शाश्वतम् ॥ वर्तते हृदये नूनं सततं त्वयि भूपते ॥ तथापि नेतुमिच्छामि बलाद्दुर्ल
भतां वर ॥ विधिनेह समागत्य मे प्रार्थनं समादरात् ॥ प्रार्थनीयो महाबाहो पिता मे नृपसांनि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वेन स्वल्पवीर्येणाबैमया ॥ तस्यतद्वचनं श्रुत्वा प्रद्युम्नस्यमहात्मनः ॥ अब्रवीदीदृशंवाक्यं भगवान्
नारदोमुनिः ॥ जेष्यसित्वं महाबाहोदानवेन्द्रं सुदुर्जयम् ॥ ब्रह्मणोवचनं पु[illegible] विपरीतंनविद्यते ॥
ब्रह्मणोवचनाद्देवदैत्येन्द्रेणाडुरात्मना ॥ जितं लोकत्रयं पूर्वंलोकपालाभिरक्षितम् ॥ तस्यतद्व
चनंश्रुत्वामहर्षेरमितौजसः ॥ कौतूहलपरोभूत्वा प्रद्युम्नोवाक्यमब्रवीत् ॥ कस्मिन्नवसरेलब्धं
ब्रह्मणोवचनंशुभम् ॥ कीदृशेनविधानेनजितंलोकत्रयंपुरा ॥ सचकस्यसुतोदैत्यः श्रोतुमि
च्छाम्यहंमुने ॥ ज्ञातास्त्वमसिसर्वेषां कार्याणां चमहातप ॥ तस्यतद्वचनंश्रुत्वा प्रद्युम्नस्य
महात्मनः ॥ कथांमंगलसंयुक्तां कथयामासनारदः ॥ राजावाराणइतिख्यातः शोणितापुरसु
प्रियः ॥ रोहिणीनामविख्याता देवी तस्यमहीपतेः ॥ तस्यादेव्याविशालाक्ष्या गर्भादेवभसाव
हः ॥ नृपतेस्तनयः श्रीमान् सुषुवेऽसुरसत्तमः ॥ तस्यसंजातमात्रेणप्रचचालमहीतदा ॥ स्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प॰पु॰ त्नेदक्षिणं चक्षुः सहस्राक्षस्य धीमतः॥संजातविस्मयः श्री ब्रह्मास्त्रविद्भिर्महर्षिभिः॥अग्रे
२० परीक्षितं तस्य लक्षणं देहसंस्मृतम्॥इन्द्रस्य दमनं यस्तु करिष्यति महाबलः॥इतीन्द्रदमनो नाम
ख्यातये शास्त्रदर्शिभिः॥वीर्येण वयसा चापि वभूवान्यर्थसंश्रितः॥किमर्थमाजिनेशाके मम
नामतथाविधम्॥कृतं महर्षिभिरिति लज्जया व्यथितेन्द्रियः॥सत्ववीर्यगुणोपेतस्तपसे कृ
तनिश्चयः॥स प्रपृच्छ गुरुं ज्ञात्वा ज्वलन्तं स्वेन तेजसा॥गुरोर्गुरुतरं वाक्यं श्रुत्वा हृष्टो महासु
रः॥रुद्रधारोदये तीर्थे चकार नियमं ततः॥वर्षाणां हि सहस्राणि वरमात्रं वरेप्सया॥तपसा
राधयामास भगवन्तं त्रिलोकपम्॥प्रभावात्तपसस्तस्य समाकृष्टो जगद्गुरुः॥विमानेनार्क
वर्णेन प्रादुरासीच्चतुर्मुखः॥ततः संभ्रममादाय प्रहृष्टोऽसुरसत्तमः॥ब्रह्माणं वरदं दृष्ट्वा इदं व रामः २०
चनमब्रवीत्॥सुरैरजेयमिच्छामि वरं दत्तं त्वया प्रभो॥त्रैलोक्यविजयश्चैव यदि तुष्टोसि मां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्तम्॥ ततो दैत्यवचः श्रुत्वा भगवान्चतुराननः॥ प्रफुल्लनयनो भूत्वा इदं वचनमब्रवीत्॥ अ
जेयस्त्वं सुरैर्भूयाः किंतु स्वर्गनिवासिभिः॥ त्रैलोक्यविजयी चैव भविष्यसि महासुरः॥ एवं सं
त॥ षयित्वाथ तपःस्थाने सुरोत्तमः॥ विमाने नांवरतलं विवेश कमलोद्भवः॥ ततो लब्धवरो वीरो
वीरनायकवेष्टितः॥ परिवार्यासुरैः सर्वैरभिषिक्तो राजह्॥ समन्तः वहुभिः सार्द्धं मंत्रिभि
श्चानुयायिभिः॥ कुष्मांडं प्रेसयामास तं देवेन्द्रस्य संसदि॥ गत्वा शक्र सभामध्ये सत्वरोऽसु
रदूतकः॥ अब्रवीदीदृशं वाक्यं कुष्मांडो घोरविक्रमः॥ प्रदत्तं ब्रह्मणा राज्यं मम भर्त्तः पुरन्दर॥
राज्यानि वीरभोग्यानि त्यक्तुमस्मात्त्वमर्हसि॥ दूतस्य वचनं श्रुत्वा रोषाद्रक्तविलोचनः॥ अ
ब्रवीदीदृशं वाक्यं भगवान्पाकशासनः॥ राज्यं त्यक्तुं न पश्यामि विना युद्धेन दानव॥ राज्यानि
वीरभोग्यानि वीर्यतद्द्रष्टुमर्हसि॥ इत्युक्तस्य सुरेन्द्रस्य वाक्यं संग्रामसूचकम्॥ कथयामास

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संग्रामोऽद्यनोदेवेन्द्रसंसदि॥ इत्युक्तवचनंश्रुत्वा ज्वलत्कोपानलाकुलः॥ उद्योगस्यसमारम्भंचका
रसुरसत्तमः॥ ततस्तस्मिन्क्षणेपुण्येप्रहतेथागदुन्दुभौ॥ संप्राप्तोभगवान्शक्रइदंवचनमब्रवीत्॥
जयार्थेनात्मनोवीरभ्रातरंकच्छपासुरम्॥ पुरस्कृत्यप्रयातव्यंशंखंशंखंरथसमस्त्वनम्॥ तस्यनादेन
घोरेणमहीकंपप्रदायिना॥ जायतेसमरेनूनंरिपूणांमतिविह्वलः॥ जित्वाशीघ्रंरणात्मानंसुरेन्द्रं
समरान्तरे॥ पूरणीयंत्वयापुत्रपूर्वजानांमनोरथम्॥ इत्युक्तोगुरुणाशीघ्रंदत्वाशीर्दैत्यसत्तमः॥
निर्ययौस्वबलैःसार्द्धमेरुपृष्ठंमनोरमम्॥ स्वर्गेणामेरुमासाद्यस्वसैन्यपरिवारितः॥ युद्धायप्रार्थया
माससुरेन्द्रंसमहासुरः॥ रिपोरागमनंश्रुत्वादेवानन्दंपुरःसरः॥ निर्ययौभगवानिन्द्रोयुद्धंयुद्ध
विशारदः॥ ततःपपातसहसाशरद्वाशिरोपरम्॥ ननादरणकुंजोयःप्रवेशसहपुष्करः॥ हस्तिना
क्रौंचराणांरथानांचैववाजिनाम्॥ बभूवतुमुलंघोरंगर्जितैर्भ्रामरद्विषाम्॥ तस्मिन्नवसरे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रिच्छतविभूषणाम् ॥ प्रद्युम्नो रूपिणां श्रेष्ठो रे दं वचनमब्रवीत् ॥ वितस्ता देविका सिन्धुः
शतद्रुः सरिदुत्तमा ॥ एताः पश्यतु सुश्रोणि पृथिव्या हारसन्निभाः ॥ कुरुक्षेत्रस्य मध्येन
गच्छन्ती पश्चिमोदधिम् ॥ एषां सरस्वती रम्या पुण्यतीर्थशतानुगा ॥ एषा पश्यतु सुश्रोणी
पावनी पृथिवीतले ॥ ग्रन्थितोत्पलमालेव भ्राजन्ती यमुनानदी ॥ सोममण्डलसंभूता निर्मलां
शुकसन्निभाः ॥ एषा संदृश्यते देवि गंगा त्रैलोक्यपावनी ॥ उपस्पृष्टजला पुण्या नैमिषारण्य
वासिनी ॥ रम्या दृषद्वती चापि सा नदी चापि दृश्यते ॥ एषा संदृश्यते देवि सरयूर्लोकपावनी ॥ पा
माश्रित्य दिवं यातो रामो दशरथात्मजः ॥ गौरी गंडस्थलोद्भूता कालांजनसमप्रभा ॥ एषा पश्यतु
सुश्रोणि गंडकी सरिदुत्तमा ॥ शैलमालानिरुद्धांगी हृदीभूता मनोरमा ॥ एषा संदृश्यते देवि
वाग्वती लोकपावनी ॥ भवान्या व्यासिता पूर्वे गौर्याराधनहेतुना ॥ प्रणम्यतां त्वया भद्रे मृगेन्द्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शिखरो गिरिः॥इत्युक्त्वा रथमुत्सृज्य प्रद्युम्नो रूपिणां वरः॥प्रविवेश सरः पुण्यं वाग्वतीजलपू
रितम्॥ततः सरस्युन्मदहंससारसे निहन्यकामाकुसुमोपसेविते॥गिरीममनोज्ञे निषसाद शोभि
केशवेः प्रभावतीविभ्रमवीक्षिताननः॥ ॥इति श्री वाग्वतीमाहात्म्यप्रशंसायां प्रद्युम्न
विजये उद्योगसंवरणो नाम ॥९॥ ॥पुलस्त्य उवाच॥अथ पंकजकिंजल्ककपिलीकृत
विग्रहम्॥शारदातपसम्पर्कजातश्रमविवर्जितम्॥गिरेर्मनोरमे मूर्ध्नि निषण्णं मकरध्वजम्॥
सा विग्रहवती भूत्वा वाग्वती वाक्यमब्रवीत्॥ज्ञात्वा चन्द्रवतीं देवी मद्धस्ते प्रतिपादितां॥
क्रु[illegible]नेशक्रदमनोज्वलत्कोपानलाकुलः॥अतस्तस्य भयत्रस्तः सूर्यकेतुर्नराधिपः॥मंत्र
जापेन घोरेण ध्यायते द्विजयं तव॥युद्धे पमानितस्तेन दैत्येन्द्रेण दुरात्मना॥तवैवाहि जयं नि
त्यं ध्यायतौ त्रिदशाधिपः॥दीर्घकालं निरुद्धांगविरुद्धांगकृतं मया॥मयापि सततं वीरध्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीमान्सूर्यकेतुर्नराधिपः॥ देवी चन्द्रवती चापि प्रद्युम्नं च महाबलम्॥ दृष्ट्वा तुतोष सहसा
नारदो भगवान्मुनिः॥ तस्मिन्स्वयंवरे पुण्ये वर्तमाने महोत्सवे॥ देवदुन्दुभिनिर्घोषैः पूरिता
नेकदिङ्मुखे॥ अप्सरोभिरनेकाभिरचिता नेकमंगले॥ विवाहं वर्तयामास चन्द्रवत्या जना
र्दनः॥ मालाश्चात्ता विचित्रैश्च चित्रैराभरणैस्तथा॥ पूरयामास देवेन्द्रः सपुत्रं मधुसूदनम्॥
वाग्मती च सरिच्छ्रेष्ठा विस्मयोत्फुल्लमानसा॥ पूजयामास विधिना सपुत्रं मधुविद्विषम्॥
ननर्तुश्चाप्सरसां वृन्दं नूपुरध्वनिनादितथा॥ गन्धर्वाश्च जगुर्गीतं वीणावेणुसमन्वितम्॥ प्र
वल्लिभिश्चापि विस्मया जलशीतले॥ नानाकुसुमवृक्षाश्चापि पुष्पवृष्टिं प्रवर्षयन्॥ सुकंपे धर
णी चापि पीवराद्रिपयोधरा॥ चन्द्रावत्या विवाहेन विस्मयाकुलमानसा॥ ततः सुरेन्द्रसन्मा
नाञ्चित्र[illegible]दामभूषणाः॥ द्वाढारत्नश्रियायुक्त इन्द्रनीलसमप्रभः॥ शंखचक्रगदापा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प॰पु॰ गिरिर्देवगन्धर्वपूजितः॥मुनिभिर्वेदशब्देन—निनोलोकरुह,आरुरोहगरुत्मन्तंभगवान्मधुसूदनः
२८ देवींचन्द्रवतींचापिराजपुत्रींप्रभावतीम्॥रथमारोपयामासप्रद्युम्नःकेशवाज्ञया॥क्षीर
नाद्यैश्चरत्नाद्यैःपूरितंरथसत्तमम्॥आरुरोहसप्रद्युम्नःकामगंहेमनिर्मितम्॥उत्पपात
तदाकाशंशक्रनीलसमप्रभम्॥सपुत्रोभगवान्विष्णुःप्रहर्षाकुलितेक्षणः॥विलोक्यधर
णींपुण्यांवाग्वतीजलशोभितीम्॥प्रहृष्टोभगवान्विष्णुरिदंवचनमब्रवीत्॥त्वाहिवाहंस
मालोक्यसूर्यकेतुर्नराधिपः॥समानुषेणदेहेनप्रागाच्छक्रपुरंशुभम्॥पश्यदक्षिणभा
गेनमृगशृंगस्यभूभुजः॥चन्द्रदीप्तातटेपुण्येस्थानंममभविष्यति॥सिंहवक्त्रवपुर्भूत्वा रामः
अहंस्थास्यामिकारणात्॥पूजयिष्यन्तिलोकाश्चममभक्तिपरायणाः॥इन्द्रेश्वरंप्रति २८
स्थाप्यमिन्द्रनद्याःशुभेतटे॥आगच्छद्रुगवानिन्द्रोयज्ञकार्यपरोभवत॥ममभक्तिपरो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

धीमूर्द्रपराजातोमहीपतिः ॥भविष्यतिममावासंदोराशिखरमूर्धनि ॥शिखरस्वामिरित्येवं
कीर्तयिष्यन्तिभूतले ॥पूजयिष्यन्तिलोकाश्चसचव्यक्तंवृषध्वजम् ॥ब्राह्मणावहवोयत्र
सन्तिस्वाध्यायशीलिनः ॥तत्राप्यवतरिष्यामिसन्ध्याकालोविशेषतः ॥पश्यकर्केदुदं
तीर्थंसर्वौषधिगिरौशुभे ॥वसन्तियत्रनागेन्द्राः कर्कोटकपुरस्सराः ॥सर्वौषधिगिरेश्चैव
दक्षिणेगिरिगह्वरे ॥तत्रापिचममावासंभवतेमकरध्वज ॥क्षेत्रपालप्रभावेणगोपितंलोक
दुर्गमम् ॥सुगमश्चापितत्रैकंभविष्यतिऋषध्वज ॥पश्यत्वद्धस्तनिहतंविराधंकच्छपासुरम् ॥
कूर्मपर्वतमित्येवंकीर्तयिष्यन्तिमानवाः ॥परितस्तस्यशैलस्यप्रभावादसुरान्तथा ॥तस्य
दृष्टिंविशेषेणभविष्यतिमहीतले ॥अत्रकूर्मगिरौपुण्येपुण्यकृद्भिनिषेवितै ॥यत्रयत्रश्रु
तंतोयंतत्रतत्रफलंभवेत् ॥तस्यकूर्मगिरेर्मूलेवाग्वत्याःपश्चिमेननु ॥भविष्यतिशिलादेहो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्कं·पु· गणेशोलोकपूजितः॥तत्रापिचममस्थानंदुर्विज्ञेयंभविष्यति।स्नानादपिचवाग्वत्यांनि
र्विघ्नंभवतेनृणाम्॥भिन्नसेतुतटेरम्येपर्वतेचन्द्रनागिरौ॥विष्णुतीर्थमितिख्यातंस्थानंमम
२९ भविष्यति॥मीनचक्रह्रदेपुण्येपुरतोममसंभवे॥द्वादश्यांस्नायतेयस्तुममलोकेमहीयते॥
पतिव्रतासुनारीशुब्राह्मणोवेदपारगे॥ममक्षेत्रेचयद्दत्तंतदक्षयमितिस्मृतम्॥चन्द्रनागि
रिमूलेपिपश्यतीर्थंप्रकामदम्॥अत्रगौर्यामहादेव्याचन्दनंघृसतेपुरा॥सुप्रभाभवनंभव्यं
नानारत्नप्रभाकरम्॥हतावशेषास्त्वसुराः करिष्यन्तिनिवेशनम्॥इत्युक्त्वाभगवान्विष्णुः
शंखचक्रगदाधरः॥विस्मयोत्फुल्लनयनंनारदंमुनिमब्रवीत्॥मनोजवेननिर्गत्यरम्यांद्वार रामः
वतींपुरीम्॥प्रद्युम्नआगतइतिकथांकथयनारद॥वाक्यंभगवतःश्रुत्वागत्वाद्वारवतींमु २९
निः॥रुक्मिण्याःपुरतःशीघ्रंकथयामासतत्कथाम्॥ततःश्रुत्वामुनेर्वाक्यंहर्षवाष्पाप्लुतेक्ष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDE

णा ॥ आहूय चेटिकान्सर्वान्रुक्मिणीवाक्यमब्रवीत् ॥ सूर्यकेतुसुतां प्राप्य प्रहृष्टं हतकराट
कम् ॥ प्रद्युम्नं मम द्रक्ष्यामि मृत्युद्वारादपागतम् ॥ मंगलं क्रियतां तस्मात्प्रत्यागमनदर्शनात् ॥
पुरद्वारे विशेषेणाशीर्युक्तं सर्वाभिरेव च ॥ अथ तीर्थोदकाः पुरयाम्गृहीतकलशाः क्वचित् ॥ दीप
हस्ताः क्वचिन्नार्यः क्वचिद्रूपकराः स्थिताः ॥ चित्रमालाम्बरधरा विलोलायतलोचनाः ॥ रत्नभा
जनहस्ताश्चास्थिताः काश्चित्पुरांगनाः ॥ पुरनारीगणाः केचिद्विशेषकृतभूषणाः ॥ सपुत्रं केश
वं द्रष्टुं स्थिताः प्रासादपंक्तिषु ॥ मार्गे भगवतो द्रष्टुं चित्रस्रग्दामधारिणः ॥ निर्ययुर्यादवाः के
चित्प्रद्युम्ने जातविस्मयाः ॥ गतमात्रेण संप्राप्तं सपुत्रं चक्रपाणिनम् ॥ प्रपूजिरे यथातथ्यं या
दवैर्जातविस्मयैः ॥ ततः सपुत्रं पुरकामिनीकरैर्विमुक्तमन्दाररजोरुणस्तनुः ॥ जनार्दनो दानव
दर्पसूदनो मनोरमां द्वारवतीं विवेश च ॥ ॥ इति श्री वा० प्र० विजये० नाम ॥ १४ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पशु·पु· यस्तुवाचयतेनित्यंप्रद्युम्नविजयंशुभम्॥प्रणश्यतिरिपुस्तस्यसंग्रामेजयमाप्नुयात्॥ ॥
ॐनमःशिवाय॥ ॥प्रणम्यशिरसाभक्त्यापशूनांपतिमव्ययम्॥पुराणंसंप्रवक्ष्यामिसु
३० निर्मितंसर्वदर्शिनम्॥शृंगेक्षितिधरेन्द्रस्यमेरोरत्नमयेशुभे॥वज्रवैडूर्यप्राकारेप्रवालांकुर
कर्कशे॥मुक्ताफलनिभैस्तोयैःश्रवद्भिःप्रविराजिते॥अप्सरोगणसंकीर्णेकिन्नरामरसेवि
ते॥मकरन्दमदोन्मत्तभृंगनादनिनादिते॥पुष्पप्रकरसंकीर्णेतडागोद्यानशोभिते॥तत्रा
सीनःस्वयंश्रीमान्कुमारःसनकाह्वयः॥जगदाह्लादनोनित्यंवाक्येनवपुषापिच॥दिव्यव रामः
ल्कलसंवीतोजटामुकुटभूषणः॥नीलाब्जपत्रनयनःपद्मोदरसमच्छविः॥मुनिभिर्देवपुत्रै
श्चपुराणश्रवणार्थिभिः॥पृच्छ्यमानोविवेकेनभगवानिदमब्रवीत्॥पादेहिमवतःपुण्ये ३०
रम्येसिद्धर्षिसेविते॥किंशुकाशोकबकुलैःपुष्पितैःप्रविराजिते॥हिन्तालतालबकुलैरर्जुनै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्चोपशोभिते ॥ नक्तमालकदंबाद्यैस्तिन्दुकाद्यैः समाकुले ॥ विल्वाग्निमन्थसोनाकैः सर्ज
शिंशपसंकुले ॥ चूतचम्पकपुन्नागपारिभद्रकदीपिते ॥ छायाद्रुमैर्महद्भिश्च लक्षाद्यैरुप
शोभिते ॥ लताभिः फुल्लपुष्पाभिर्विविधाभिर्विराजिते ॥ नृत्यद्भिर्मयूरैश्च कूजद्भिश्चापि कोकिलैः ॥
भ्रमद्भिर्भ्रमरैश्चापि समन्तादुपशोभिते ॥ दात्यूहैश्च चकोरैश्च कपिंजलकुलैस्तथा ॥ वराह
यूथैर्विक्रान्तै मृगयूथैश्च संश्रिते ॥ कपिशार्दूलगवयगजागण्डकसेविते ॥ स्वंधियेति रु
चिरे वने सिद्धादिसंज्ञके ॥ श्लेष्मान्तक इति ख्यातो नागेन्द्रो नागिनीप्रियः ॥ सम्यगाराध
यामास भगवन्तं महेश्वरम् ॥ ततः कालेन महता देव्या सह समागतः ॥ प्रहृष्टो भगवाञ्छं
भुरिदं वचनमब्रवीत् ॥ सुरासुरैरवध्यश्च नित्यं मत्प्रियकारकः ॥ भविष्यसि फणिश्रेष्ठ स्व
च्छन्दगतिरेव च ॥ इदं वनवरं पुण्यं पुण्यकृद्भिर्निषेवितम् ॥ भविष्यति जगत्ख्यातं तवना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ष्मा भुजंगम ॥ एवं संभाष्य नागेन्द्रं विस्मयोत्फुल्ललोचनम् ॥ निरीक्ष्य देवीं पार्श्वस्थां भवानी
मिदमब्रवीत् ॥ चन्द्रभागा तटे देवि पश्य चन्द्रसमोज्ज्वलाम् ॥ पश्य भगवतीं चापि वाराहीं च स
रिद्वराम् ॥ ज्येष्ठिलां च नदीं पुण्यां पुण्याशोकवनिं तथा ॥ पश्य तीर्थान्यनेकानि मन्प्रभावा
गतानि च ॥ श्यामाकशिखरं रम्यं चंपकद्रुमसंकुलम् ॥ मृगकूटमिदं पश्य मृगयूथसमाकु
लम् ॥ भृंगेश्वरमिमं पश्य मद्रूपं लोकपूजितम् ॥ सेवितं पर्वपर्वेषु देवैर्ब्रह्मरुद्रपिभिः ॥ मृग
यूथं स्मिन्प्रविश्य रम्ये वनवरे शुभे ॥ मृगरूपं समास्थाय चरिष्यामि सुलोचने ॥ यदा मद्दर्शनो
द्युक्ताः ब्रह्मविष्णुपुरन्दराः ॥ पृच्छन्ति यदि मद्रूपं कथ्यतां सुरसुन्दरि ॥ एवं संभाष्य भगवान् एम॰
देवीं देवेन्द्रपूजितः ॥ चचार विपिने रम्ये हरो हरिणरूपधृक् ॥ ॥ इति श्री वा॰ प्र॰ पद्मपु ३१
तिपुराणे श्लेष्मान्तकवनवर्णनो नाम ॥ १५ ॥ ॥ सनत्कुमार उवाच ॥ एतस्मिन्नन्तरे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कालेभगवान्पाकशासनः ॥ विष्णुनासहितोगत्वाब्रह्माणमिदमब्रवीत् ॥ भगवन्पद्मगर्भाभ
पद्मयोनिस्वयोनिज ॥ त्रातुमर्हसिमांनाथदुःखाच्छंभोरदर्शनात् ॥ शंभोर्विनानलोकस्यकार्यं
शोभतिपद्मज ॥ शम्भुंलोकस्यगोप्तारंनपश्याम्यधुनाविभो ॥ इदंरहस्यंब्रह्मेन्द्रशास्यतेयदि
दानवैः ॥ क्रियतेहरणांलोभात्समराज्यस्यनिश्चयम् ॥ मुञ्जवन्तंगिरिंदृष्ट्वाजयेमुकुटभूषण गत्वा
म् ॥ महेश्वरप्रतीकाशंनन्दिनंवृषवाहनम् ॥ वचनात्तस्यब्रह्मेन्द्रपरिभ्राम्यमहीतले ॥ त्वत्स
काशमहंप्राप्तोमूढःशंभोरदर्शनात् ॥ तस्माद्योगवलेनाशुप्रविलोक्यमहीतलम् ॥ प्रसादं
कुरुराजेन्द्रममानस्यशुभाशया ॥ तस्यतद्वचनंश्रुत्वाब्रह्मालोकपितामहः ॥ अब्रवीदीदृशं
वाक्यंध्यात्वायोगवरंतदा ॥ पादेहिमवतःपुण्येरम्येसिद्धाद्रिसंज्ञके ॥ श्लेष्मान्तकालये
रम्येशंकितोस्मिमहेश्वरम् ॥ तस्माच्छ्लेष्मान्तकवनंगन्तव्यंत्रिदशेश्वर ॥ अहमप्याग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पशु॰पु॰ मिथ्यामिशंभोर्दर्शनकांक्षया ॥ वचनान्ते ततस्तस्य ब्रह्मणः परमेष्ठिनः ॥ त्रिदशाधिपतिः श्रीमा
न्नुतोपसहस्रैर्वसः ॥ ततः शीघ्रवेगेन रम्यं श्वेषाचलकालयम् ॥ संप्राप्ता भ्रान्तहृदया ब्रह्मवि
३२ ष्णुपुरन्दराः ॥ ततश्चन्द्रनिभा[illegible]ाः पुलिनेति मनोहरे ॥ विलसन्तीं विशुद्धाभिर्वालुकाभिः शु
भाननाम् ॥ नीरजपत्रनयनां तन्वंगीं सुपयोधराम् ॥ भ्राजन्तीं वनखंडस्य लक्ष्मीं मूर्त्तिमती
मिव ॥ तां दृष्ट्वा पार्वतीं देवीं ब्रह्मविष्णुपुरन्दराः ॥ विस्मयं परमं जग्मुः किंचिन्मोहवशं गताः ॥ 26
प्रोवाच वचनं ब्रह्मा विरिञ्चिन्द्र प्रतिचोदितम् ॥ हृदि शंकां निधायैवं रूपौदार्यगुणेन वै ॥ शु
चिस्मिते त्वया भद्रे दृष्टो सौ भुवनेश्वरः ॥ रूपौदार्यगणैः श्रोणि पार्वती त्वं हि निश्चयम् ॥ शंभो रामः
र्विना न लोकस्य कार्यं शोभति सुव्रते ॥ शंभुं लोकस्य भर्त्तारं न पश्यामो वयं वनम् ॥ तस्य तद्वच ३२
नं श्रुत्वा ब्रह्मणः परमेष्ठिनः ॥ अब्रवीदीदृशं वाक्यं पार्वती लोकसुन्दरी ॥ मृगकूटगिरेर्मूर्ध्नि वि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDE

क्ष्मीर्गौ मृडुशाङ्कले ॥ द्रक्षासि नियतं देवमृगरूपधरं हरम् ॥ वचनान्तरे च देव्याः प्रहर्षाकुलितेक्ष
णाः ॥ मृगकूटगिरिं रम्यं प्रजग्मुः सुरसत्तमाः ॥ ततो मृगगिरेर्मूर्ध्नि विस्तीर्णे मृडुशाङ्कले ॥ शिला
तले सुखासीनं प्राम्यास्यधिकं शुभम् ॥ एकशृंगं त्रिनयनं दंष्ट्रांकुरविभूषणम् ॥ मृगैः संख्यै
र्विविधैः परितः परिवारितम् ॥ कुलपर्वतमध्यस्थमिव कांचनपर्वतम् ॥ ददृशुः सहसा देवा हरं ह
रिणरूपिणम् ॥ ततः सप्रणयाः शीघ्रमनलक्षेणिकैः सुताः ॥ जगृहुः सहसा शृंगं ब्रह्मविष्णुपुरन्द
राः ॥ त्रिखण्डं पतितं शृंगं त्यक्तं तेषां करे तदा ॥ निर्ययौ सहसाकाशं भगवान्हरिणेश्वरः ॥ ततो विष
मवदनो दृष्ट्वा देवेन्द्रशार्ङ्गिणौ ॥ शिरस्यंजलिमादाय ब्रह्मा स्तोत्रमभाषत ॥ नमस्ते लोकनाथा
य त्र्यंबकाय त्रिशूलिने ॥ हराय हरिकेशाय हेमचीरांबराय च ॥ रुद्रेश्वराय रुद्राय रुरुवक्षशिरा
य च ॥ व्यक्ताव्यक्तशरीराय जगतां सृष्टिहेतवे ॥ कैलासवासिने चैव मेरुमन्दरचारिणे ॥ हिमव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पशु·पु· द्वासिने चैव विन्ध्याद्रिनिलयाय च ॥ श्लेष्मान्तकवने रम्ये चित्र क्रीडाविधायिने ॥ मृगरूपं स
मास्थाय मृगमध्यविचारिणे ॥ वरदानैकदक्षाय स्थित्यनुग्रहकारिणे ॥ त्राता त्राणार्थिनां
३३ नित्यं नमोस्तु नमस्व च ॥ ममैभिर्विविधैः पुण्यैस्तुष्ट्वा त्रिभुवनेश्वरम् ॥ भगवान्पद्मगर्भाभः पुनरे त्रि
वेदमब्रवीत् ॥ व्यक्तीभव महादेव व्यक्तीभव महेश्वर ॥ त्वं हि नः शरणार्थानां त्राता भुवनेश्वर ॥ ॥
इति श्रीया॰ पु॰ पशुपतिपुराणे हरिणेश्वरशृंगहरणो नाम ॥ १८ ॥ ॥ सनत्कुमार उवाच ॥
ततस्तस्य वचः श्रुत्वा ब्रह्मणः परमेष्ठिनः ॥ द्योतयन्स्वप्रभाकाशं भगवानिदमब्रवीत् ॥ शृंगमात्र एमृः
परितुष्टा भगवन्तः सुरोत्तमाः ॥ किं कारणं शरीरेण हरिणेन पुनर्मम ॥ असमाप्तेति क्रीडायां
मया रूपेण भूतले ॥ नेच्छामि स्वर्गमायातुं मीहाज्ञान्नं प्रबोधनात् ॥ अस्ति भूधरराजस्य पादे ३३
हिमवतः शुभे ॥ नागह्रदमिति ख्यातं निरुद्धं वाग्वती जलम् ॥ चन्द्रबिंबप्रतीकाशं पद्मोत्पलवि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDE

भूषणम् ॥ मीनचक्रसमाकीर्णं हंससारससंकुलम् ॥ वहुभिः शैलमालाभिर्गोपितं लोक
दुर्गमम् ॥ नत्वाहं प्रभविष्यामि वासुकेस्तपसो बलात् ॥ प्रद्युम्न इति विख्यातः कल्लोहकस्म
सुतो बली ॥ सह निष्यति दैन्येन्द्रं ब्रह्मणो वरदर्पितम् ॥ निहते त्विन्द्रदमने नदा कमलसंभवा ॥
सेतुं विदार्य कृष्णेन वाग्वती परिमोक्षते ॥ वाग्वती च नदी भूत्वा वने जाते च मण्डले ॥ समुत्प
त्स्यामि वृषसेन्द्रन स्त्रीरशिलामनुः ॥ वहुला क्षीरधाराभिः सिक्त्वा समुपलक्ष्य च ॥ नदा संदृ
श्यते लोकैः खनिते च नदीतटे ॥ चंपकद्रुमछायाभिः शोभितं मम विग्रहम् ॥ चतुर्मूर्त्तिधरं भ
क्त्या म्लेच्छैः संपूज्यते नदा ॥ जित्वा कैरातराजानं वाक्येन प्रत्ययेन च ॥ करिष्यति नदा राज्यं
वैशाल्याधिपतिर्बली ॥ मूर्त्तिं जेकाममेवापि ब्राह्मणाश्च प्रतिष्ठति ॥ तस्मान्मान्यश्च पूज्यश्च
ब्राह्मणो धर्मकांक्षिभिः ॥ अत्र राज्यप्रदानादिष्वाधिकारेषु भूरिषु ॥ ब्राह्मणानां नियोगेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रवृत्तिः प्रभविष्यति ॥ लिछवीनां नरेन्द्राणां राज्यं भूमिमिमां शुभाम् ॥ प्रजा चाप्याश्रयिष्य
न्ति वहिर्देशागतास्सदा ॥ शिशुपालावतारेण श्रीमता भक्तवर्मणा ॥ करिष्यति जगत्कीर्तिर्मम
कामम्प्रशासनात् ॥ प्रजाः पुण्यरताः सर्वा धार्मिकश्च नराधिपः ॥ प्रसादपंकयाश्चित्रा भवन्ति
मम तेजसा ॥ तदा संपूज्यते भक्त्या प्रजाभिर्देशवासिभिः ॥ मत्पुर्लोकनिमितंकूटागारोदरस्थि
तम् ॥ मम दक्षिणभागेन यस्तु प्राणान्परित्यजेत् ॥ प्रभावात्क्षेत्ररात्नस्य नरकं नाधिगच्छति ॥
मम पूर्वेण भागेन वाग्वत्याः सलिले शुभे ॥ स्नायन्ते सततं यस्तु तस्य पुण्यं महद्भवेत् ॥ मम पू
र्वोत्तरे भागे वाग्वती तटमूर्धनि ॥ वासुकेः प्रथमं कार्यं सम्पूजाराधने सदा ॥ घृतेन मधुना वापि
दध्ना चेक्षुरसेन च ॥ गन्धोदकेन क्षीरेणा शीतलोदकेन वा पुनः ॥ मम स्नाने प्रदत्तस्य तस्य पुण्य
फलं महत् ॥ अनेनैव भवे स्वर्गो लब्धभोगो नरोत्तमः ॥ घृतस्नानेन मल्लोकं मधुना तत्समन्वि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

रम् ॥ दद्यात्तु वै स्नवं लोकं व्रजते मम मन्दिरात् ॥ वैधाधरपदं भूयात् स्नानादिक्षुरसेन तु ॥ गन्धो
दकेन गान्धर्वं क्षीरेणाशिनि नालये ॥ शीतोदकस्य स्नानेन सर्वपापैः प्रमुच्यते ॥ अंगपूजां तु
यः कुर्यात्पुष्पैर्नानाविधैर्मम ॥ सर्वकामफलं भुक्त्वा मोदते मनुजालये ॥ अंगप्रदीपं यः कुर्या
न्मम भक्त्या सुसंयतः ॥ स्वयंप्रभेषु देशेषु समुत्पत्तिः प्रवर्तते ॥ अंगप्रदक्षिणं यस्तु करोति
मम भक्तिवान् ॥ रूपवान्भवते ऽत्यन्तं वज्रसन्तहनोपि वा ॥ अंगपूजां तु यो दद्यान्मम भक्त्याति
यत्नतः ॥ आयुष्मान्बलवान्भूयाज्जायते च महीपतिः ॥ दीपमालास्तु यो दद्याद् भवने मम भक्ति
तः ॥ चक्षुष्मान्भवते ऽत्यन्तं तेजस्वी वापि चैव ह ॥ गुग्गुलं दहते यस्तु सततं मम भक्तिवान् ॥ तस्य
पार्श्वविशेषेण वरं तस्मिन्न संशयः ॥ तिलपात्रप्रदानेन नाशयेत्किल्विषादलम् ॥ तथैव च वसु
वर्णांन तथैव तिलधेनुना ॥ हेमशृंगी रौप्यखुरां चैलघंटावलंबिनीम् ॥ सवत्सां कपिलां दद्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्रूपायज्ञफलंशुभम् ॥रत्नकञ्चप्रदानेनभवेद्बहुरत्नवान् ॥वस्त्रवान्वस्त्रदानेनभूमिदानेनभू
मिवान् ॥गीतनृत्यप्रदानेनतूर्यनादसुनादिना ॥ममपार्श्ववरोभूत्वाजायतेदुःखवर्जितः ॥नीलोत्प
लार्कपद्मेनप्रदत्तेनाश्रियंलभेत् ॥वकेनबिल्वपत्रेणावरदोस्मिविशेषतः ॥मोक्षंधत्तूरकेनापिकरवीरा
द्वरप्रदः ॥जात्यादिनासुगन्धेनपुष्पेणासुभगोभवेत् ॥पुष्पैःपत्रैःफलैस्तोयैर्योमामर्चयतेसन्ततम् ॥
सोपिस्वर्गफलंभुक्त्वामोदतेनात्रसंशयः ॥मममूलेसमुद्भूतंप्राक्दसमयनिःसृतम् ॥तीर्थंमृगोदकं
नामतत्रैवञ्चपदृश्यते ॥मृगोदकोद्भवेतीर्थेवाग्वत्याःपश्चिमेतटे ॥जन्मान्तरकृतैःपापैःस्नानमात्रेण
मुच्यते ॥अत्रपावनिकानामवाग्वत्याःपूर्वकेतटे ॥तत्रापिचकृतस्नानात्पार्वतीपरितुष्यति ॥अत्र
कोषोदकंनामतीर्थंकामफलप्रदम् ॥कोषंकोषंसमाहृत्यसुरैःसर्वैःप्रकल्पितम् ॥तीर्थेकोषोदके
चापितदग्रेचनदीजले ॥तत्राभिषेकंयःकुर्यात्सोसहस्रफलंलभेत् ॥त्रिसन्ध्यंतुसमासाद्यसंध्यां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDE

पः समुपासते ॥ किल्बिषान्मुच्यते व्यक्तं स द्विजः परिमुच्यते ॥ भृगुप्रपतनन्नाम कन्दरं चापि वि
द्यते ॥ तस्मात्प्रपतनाद्वापि स्वर्गलोके महीयते ॥ भृगुकन्दरमूले तु ब्रह्मभेदे मनोरमे ॥ स्नायते विधि
ना यस्तु ब्रह्मलोकं स गच्छति ॥ अत्र गोक्षुरकं नाम तीर्थं कामफलप्रदम् ॥ तत्राभिषेकं यः कुर्याद्गो
सहस्रफलं लभेत ॥ गौरीशिखरमूले तु वाग्वत्यां यस्तु स्नायते ॥ स्त्री पुं सौभाग्यमाप्नोति देव्या
लोकं स गच्छति ॥ स्तनकुंडं समासाद्य स्नायते यस्तु मानवः ॥ स्कन्दलोकमवाप्नोति भूत्वा वै
श्वानरद्युतिः ॥ अत्र पंचनदी नाम तीर्थं ब्रह्मर्षिसेवितम् ॥ पंचयज्ञफलं तत्र स्नानमात्रेण लभ्यते ॥
शूलेऽगे गेभुमे तीर्थे स्नायते यस्तु मानवः ॥ जातिस्मरमवाप्नोति तीर्थे कोनियमान्वितः ॥ प्राप्यास्त्रा
तकपानीयं गुह्यकरक्षितम् ॥ स्नायते विधिना यस्तु यक्षलोकं स गच्छति ॥ अत्र ब्रह्मोदकं प्राप्य ती
र्थं कन्दरनिःसृतम् ॥ स्नायते विधिना यस्तु न मृत्युस्तं प्रपश्यति ॥ योगकुंडे देववाप्यां कुमारीक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पशु॰पु॰ न्द्रेषु च ॥ ब्रह्मदीपे विशेषेण स्नातव्यं स्वर्गकांक्षिभिः ॥ यस्तु संपूजयेद्भक्त्या पशुयोनिं ममप्रिया
म ॥ मुच्यते पशुपाशेभ्यः कामसिद्धिं च लभ्यते ॥ यो दद्यादन्नमक्षेत्रेस्मिन्ब्राह्मणेभ्यश्च भोजनम् ॥
३८ तस्य यज्ञफलं भूयात्स्वर्गलोकमवाप्यते ॥ ॥इति श्री वा॰प॰ पशुपतिपुराणे ईश्वरवाक्यं ॥ १८ ॥
सनत्कुमार उवाच ॥ ॥तस्य तद्वचनं श्रुत्वा ब्रह्मा लोकपितामहः ॥ अब्रवीदीदृशं वाक्यं नमस्कृत्य पुनः
पुनः ॥ दुःखार्णवनिमग्नानां प्राणिनां मोक्षकारणात् ॥ शास्त्री हत्वं सदा देव पुराणममृतोपमम् ॥
त्वन्मुखोक्तमिदं सारं पुराणं परमेश्वर ॥ श्रूयते विधिना यस्तु स्वर्गं तस्य न दूरतः ॥ इदं पुनर्महापुण्यं
पुराणं लोकदुर्लभम् ॥ शृणोति सततं यस्तु स्वर्गस्तस्य न दुर्लभम् ॥ मस्तकस्थेन शृंगेन विष्णोर्हस्त रामः
स्थितेन च ॥ पुरन्दरकरस्थेन किं कर्तव्यं महेश्वर ॥ तस्य तद्वचनं श्रुत्वा ब्रह्मणः परमेष्ठिनः ॥ अब्र ३८
वीदीदृशं वाक्यं भगवान्हरिणेश्वरः ॥ त्वत्करस्थमिदं शृंगं हरिणं मममध्यम ॥ अत्रैव स्थाप्यतां ब्रह्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

कर्त्ता च लोकानां त्वमेव परिकीर्तितः ॥ समर्थश्च हृषीकेश सेतुबन्धविदारणे ॥ गंगां द्रष्टुं ममेच्छा
स्ति त्वत्प्रसादाज्जनार्दन ॥ वाग्वत्या वचनं श्रुत्वा हर्षोत्फुल्लविलोचनः ॥ सेतुं विदारयामास स निरु
द्धं भगवान्हरिः ॥ सेतुबन्धे प्रभिन्ने तु विष्णुना प्रभविष्णुना ॥ ददर्श सहसा घोरं विराधं कच्छपासुर
म् ॥ ततः स दृष्ट्वा मार्गेण विराधं घोररूपिणम् ॥ नारदो भगवान्शीघ्रं प्रद्युम्नमिदमब्रवीत् ॥ कु
तोऽस्मात्तुरात्मानं विराधं दानवाधमम् ॥ तस्य कुक्षिगतं रत्नं शीघ्रमाहर्तुमर्हसि ॥ महर्षेर्वचनं
श्रुत्वा खड्गाग्रं प्रहरान्तरात् ॥ आददे स महारत्नं प्रद्युम्नो लघुविक्रमः ॥ परिवृत्त्य वपुः शीघ्रं संक्रुद्धः
कच्छपासुरः ॥ प्रद्युम्नं त्रासयामास वर्द्धमानः पुनः पुनः ॥ अथ कृजीवितं दृष्ट्वा संक्रुद्धं कच्छपासु
रम् ॥ अब्रवीदीदृशं वाक्यं नारदो मुनिसत्तमः ॥ दैत्यानां दानवानां च प्रसादाच्छूलपाणिनः ॥
वाग्वती जलसंश्लेषाद्वधस्तेषां न विद्यते ॥ तस्माद्विक्षिप्य पक्षेण जलं पन्नगविद्विषः ॥ पातनी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यं शिरश्छित्वा चक्रेण मकरध्वजः॥ महर्षेर्वचनं श्रुत्वा नरुणा दिव्यवर्चसा॥ शिरश्छि
च्छेद कूर्मस्य पितुश्चक्रेण केशविः॥ विरोधं निहतं दृष्ट्वा प्रद्युम्नेन महात्मना॥ ववर्षकु
सुमं देवो विस्मयाकुलमानसान्॥ ततश्चन्द्रवतीं गृह्य वाग्वती सरिदुत्तमा॥ विस्मयोत्फु
ल्लनयनं प्रद्युम्नमिदमब्रवीत्॥ विश्वासार्थं त्वया वीर मङ्गले प्रतिपादिताम्॥ इ[illegible]ां चन्द्र
वतीं गृ[illegible]ं गृह्णीष्व मकरध्वज॥ इत्युक्त्वा वाग्वती देवी गते संज्ञा[illegible]ते विस्मये॥ बभूव स
न्ध्यासमये कुंकुमारुणवारिदम्॥ नभसा पूरिते व्योम्नि ज्योत्स्नानिकरसंहतः॥ तदुत्सवा
द्दिवोद्गतो राजरजनीकरः॥ वधूं चन्द्रवतीं दृष्ट्वा चन्द्रलेखामिवापराम्॥ तुतोष भगवान्
विष्णुर्विस्मयोत्फुल्ललोचनः॥ दे[illegible]ी चन्द्रवती चापि [illegible]॥ राजराज्ञ
क्षीव प्रद्युम्ने समुपस्थिता॥ जयान्तरं समासाद्य प्रद्युम्नं रूपिणां वरम्॥ तुतोषातिशयं

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

काद्यं नागास्त्रं घोररूपिणम् ॥ नागास्त्रं पतितं दृष्ट्वा विषवह्निकलापिनम् ॥ हाहाकृतरवै
र्देवैः प्रपूरे गगनं तदा ॥ नागास्त्रदग्धप्रद्युम्नं पतितं वाणिविह्वलम् ॥ पक्षवातेन तार्क्ष्यस्य
लब्धचेतो बभूव ह ॥ नागास्त्रोपि दुराधर्षस्तार्क्ष्यसंपर्कपीडितः ॥ पपात सहसा भूमौ
खंडखंडमनेकधा ॥ ततस्तस्मिन्क्षणे पुराये प्रद्युम्नं प्राप्य सत्वरम् ॥ अब्रवीदीदृशं
वाक्यं भगवान्नारदो मुनिः ॥ ब्रह्मणा भाषितं पूर्वं स्मर वाक्यं जनार्दने ॥ नागाविह्वल
तावीरस्तत्रासि मधुविद्विषः ॥ शस्त्रेणोपेक्षते जेतुं हीन शस्त्रं भवेद्रिपुम् ॥ मुष्टिमुद्यम्य वे
गेन हन्यतां तस्य मूर्धनि ॥ तस्य तद्वचनं श्रुत्वा वेगान्निष्पत्य केशवात्मजः ॥ मुष्टिमुद्यम्य सहसा
शिरस्तेन तताडयत् ॥ ततः पपात दैत्येन्द्रः कंपयन्निव मेदिनीम् ॥ उद्वमन्रुधिरं घोरं मुखेन नय
नेन च ॥ सुप्रभावासिनः सर्वे निहते शत्रुतापने ॥ पातालं विविशुरम्यं प्रद्युम्नभयपीडिताः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विचित्रपुष्पंप्रचुरंनभस्थलात्प[stain]न्तप्रद्युम्नशिरस्यतस्तदा ॥ समंसमन्तात्सुरसिद्धचारणैः
समाहितास्तुष्टुभयंप्रसस्वनम् ॥ ॥इतिश्रीवाग्वतीमाहात्म्यप्रशंसायांमहेन्द्रदमनवधो
नाम ॥१३॥ ॥पुलस्त्यउवाच ॥ ततस्तस्मिन्क्षणेपुण्यवाग्वतीकामरूपिणी ॥ अब्रवीदी
दृशंवाक्यंकृताञ्जलिपुटासती ॥ विष्णुःकृष्णोहृषीकेशश्चक्रपाणिश्चतुर्भुजः ॥ उपेन्द्रःशा
र्ङ्गधन्वाचभद्रकीर्तिरधोक्षजः ॥ केशवोरुक्मिणीनाथोमाधवोमधुसूदनः ॥ सत्यभामापति
श्चैवद्वारकापुरसुप्रियः ॥ मित्रविन्दाधिपश्चैवजाम्बवत्याधिपस्तथा ॥ कंसासुररिपुश्चैवरो
हिणीपतिरेवच ॥ नमोस्तुलक्ष्मीपतयेधरणीपतयेनमः ॥ घोरकूर्मवपुर्भूत्वामन्दरंविधृतंत्व
या ॥ वाराहंरूपमास्थायत्वयैवधरणीधृता ॥ कार्तवीर्यंनिहन्ताचत्वयाभार्गवछद्मना ॥ निह
न्तारावणस्यापित्वमेवराघवोऽभवत् ॥ ज्ञानाचारणार्थिनश्चैवदाताचापिसुखस्यच ॥ स्थिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तद्वचनंश्रुत्वादैत्येन्द्रस्यमहात्मनः॥अब्रवीदीदृशंवाक्यंप्रद्युम्नोबलिनांवरः॥निर्यातितोम
याशंबरः शंखदुन्दुभिनिःस्वनः॥विराधंपातयिष्यामिदुरात्मानंजलोषितम्॥प्रद्युम्नइति
विख्यातोविष्णोर्भगवतःसुतः॥प्राप्तोयुष्माहिनाशायदेवेन्द्रस्यचआज्ञया॥तस्यतद्वचनंश्रु
त्वाक्रोधाद्रक्तविलोचनः॥अब्रवीदीदृशंवाक्यंविहस्यासुरसत्तमः॥यदिकेशवपुत्रस्त्वंसं
प्राप्यभद्रकंकृतम्॥चिरकालंमयाध्यातोलब्धंसंदर्शनंतव॥त्वांविलोक्यरणेखड्गंरुधिरेण
परिप्लुतम्॥शंबरस्यवधोद्भूतमग्निरद्यप्रशाम्यते॥इत्युक्त्वादशनैःस्त्रीद्वैपिपीड्याधरंस्वकं
वबन्धशरवौघंश्रीमानसुरसत्तमः॥ततस्तस्मिन्स्वरणेपुरायेवर्तमानेरणोत्सवे॥गरुडेनाययौवि
ष्णुःशीघ्रंप्रद्युम्नोपिमहाबलः॥अब्रवीदीदृशंवाक्यंमुदितादित्यसन्निभः॥त्वांनिपात्यदुरात्मानं ५.
त्रिदशाधिपकंटकम्॥चन्द्रवत्याविवाहश्चनिर्विघ्नंवर्तयाम्यहम्॥इत्युक्त्वारुक्मिणीसूनुः

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कृतगांडीवहस्तकम्॥सुमोचसहसावाणांस्त्वकमपुंखंविदूषणाम्॥ततस्तस्मिन्क्षणेपुण्येवर्त
मानेरणोत्सवे॥गरुडेनाययौविष्णुःशंखचक्रगदाधरः॥प्रहृष्टैस्त्रिदशैःसार्धमप्सरोवेष्टि
तैस्तदा॥पूजार्थंरुक्मिणीसूनोःसंप्राप्तस्त्रिदशेश्वरः॥ततोमुमोचदैत्येन्द्रोज्वलत्कोपानला
कुलः॥अघोरंचघोरंनामरौरवंस्वाशनीसुखम्॥उमाशिखविडालास्यरुद्रकिंकिणिभिः
शरैः॥तच्छरंवारयामासप्रद्युम्नोबलिनांवरः॥गृध्रकंकमुखश्चैवकाकोलूकमुखंशरम्॥
मुमोचसमहाबाहुःश्रीमानसुरसत्तमः॥व्याघ्रसिंहशृगालस्यश्वानवक्त्रैःशिलीमुखैः॥त
च्छरंवारयामासप्रद्युम्नोबलिनांवरः॥एकैकेनास्त्रमुख्येनएकैकमसुरंतदा॥पातयामा
सप्रद्युम्नस्तत्क्षणात्समरान्तरे॥स्तोकावशिष्टंसबलंप्रसमीक्ष्यमहासुरः॥प्रद्युम्नस्यवि
नाशायनागास्त्रंसंदधेतदा॥ततोमुमोचसहसाश्रीमानसुरसत्तमः॥विषाग्निज्वलिता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDF

हत्वादैत्यंदुरात्मानंसानुजंराज्यदर्पितम्॥पूरणीयंत्वयापुत्रदेवेन्द्रस्यमनोरथम्॥इत्युक्त्वामुनि
नाशीर्युंजयाशी — पूजितः॥निर्ययौरुक्मिणीसूनुरम्यंशंखालयंगिरिम्॥छित्वाशंखबिल
द्वारेकृतनादोमहाबलः॥सेतोर्विदारणारम्भंचकारमकरध्वजः॥ततःशंखोविनिष्क्रम्यस्वबि
लाद्बलदर्पितः॥अब्रवीदीदृशंवाक्यंदृष्टिदीप्तविलोचनः॥कस्याज्ञयात्वयाक्रूरममवीर्याभि
रक्षितम्॥अ[illegible]पिविहृशौर्वा[illegible]पिक्रियतेसेतुदारणम्॥इत्युक्त्वासहसादैत्योरक्तोस्योरक्तमूर्ध
जः॥तलेनाहत्यप्रद्युम्नंचकारमतिविह्वलम्॥ततःक्षणात्समुत्थायबाहुयुद्धेनदानवम्॥भूमौ
निपातयामासप्रद्युम्नोबलिनांवरः॥भूमौनिपातितंशंखंविक्षुब्धांबुसमस्वनम्॥पादेनाक्र
म्यजठरेप्रपूरेतिशयंतदा॥शंखनादेनघोरेणप्रबुद्धोकच्छपासुरः॥जलान्निष्क्रम्यवद्गनंत
नादातिशयंभयात्॥ततोविराधंयनघोरानिःस्वनंमहासुरंवमंडललोचनद्वयम्॥ददर्शवीरो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प॰पु॰ मधुसूदनात्मजोजलाशिनंशैलसमानविग्रहम्॥ ॥इति श्रीवाग्वतीमाहात्म्यप्रशंसा
२४ यांप्रद्युम्नविजयेविराधदर्शनोनाम॥१२॥ ॥पुलस्त्यउवाच॥ततःशंखनिनादेनविरा
धस्यस्वनेनच॥विलंप्रकंपितंदृष्ट्वा किमितिकृतसंभ्रमः॥परिशंकेरिपोःकिंचिद्भयंभयविधायि
भिः॥निमित्तैःसहसाराजारवड्गबाणधनुर्धरः॥सन्नद्धःकवचेयोरैयोधैःकतिपयैर्वृतः॥शैलशृं
गप्रतीकाशोभिन्नवैडूर्यसुप्रभः॥अविरोधितवैरीकोविराधाख्यंममानुजम्॥विरोधयतिदुर्बु
द्धिरित्युक्त्वाक्रोधमूर्छितः॥निष्क्रम्यस्वबिलात्तस्थौश्रीमानसुरसत्तमः॥समक्षयतितंशत्रुं
निर्दहन्निवतेजसा॥ततोविबाधितंत्यक्त्वाविराधंक्रूरमर्दपिरागम्॥दैत्येन्द्रस्तंसुखंतस्थौरथमारुह्य एसः
कैशाविः॥प्रत्यक्षमागतंदृष्ट्वाप्रद्युम्नंयुद्धकांक्षिणाम्॥अब्रवीदीदृशंवाक्यंश्रीमानसुरसत्तमः॥ २४
कस्याज्ञयात्वयाक्रूरबाधतेममकच्छप॥कस्यपुत्रइतित्वांवज्ञातुमिच्छामितत्त्वतः॥तस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDF

पृथक् ॥ वस्त्राभरणरत्नानिदत्त्वार्घ्यानिसमाददे ॥ ततोमंत्रंसमालोच्यमंत्रिभिःसहसासुरः ॥ वि
श्वकर्मणामादिश्यनिर्ममेभवनोत्तमम् ॥ रुरोधवाग्वतींचैवचन्द्रनागिरिमालयाम् ॥ सेतु
संरक्षणेशंस्वंस्थापयामाससादरात् ॥ आदिदेशनिवासायविराधंवाग्वतीजले ॥ सचसाप्रभा
वतीचापियथाकामंसमादिशत् ॥ कन्याशतंसमागृह्यविवाहेनमहासुरः ॥ विवेशभवनं
राजासुप्रभानामविश्रुतम् ॥ हेमवेश्मशतानाकीर्णेरत्नतोरणशोभिते ॥ तडागोद्यानरुचिरेविम
लेसुमनोहरे ॥ कामिनीभिःसहस्वेच्छंसततंराजलीलया ॥ बुभुजेतिचिरंभोगंसोसुरोदेवदुर्ज
यः ॥ ब्रह्मणोवचनात्तस्माद्विपरीतंनविद्यते ॥ ब्रह्मणोवचनादेवयशःसानियतंत्वया ॥ इत्युक्त
वतिदेवर्षौदिदीपेशिखरंगिरेः ॥ पद्मरागशलाकाभिरविरश्मिभिरंशुमान् ॥ ततोमुनेर्वाक्यविश्र
ब्धमानसंविलोलहारंहरिचित्तनन्दनम् ॥ रराजप्रद्युम्नवपुःप्रभावतीभुजद्वयालिंगनचन्दन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प. पु. च्युतम्॥ ॥इति वाग्वतीमाहात्म्यप्रशंसायां प्रद्युम्नविजये नारदवाक्यं नाम॥११॥ ॥
पुलस्त्य उवाच॥ ततः प्रहृष्टहृदयो हर्षरोमांचिततनुः॥ अब्रवीदीदृशं वाक्यं श्रीमान्मकरकेतनः॥
२३ पतिव्रते त्वया देवि क्रियतां मम मंगलम्॥ महर्षेर्वचनं श्रुत्वा सुतं तत्कमलानने॥ ततः प्रभावतीदे
वी बाष्पपूर्णविलोचना॥ मंगलं रचयामास पत्युर्जयविधायिनी॥ मंगलं रचितं दृष्ट्वा देव्या मक
रकेतनम्॥ अब्रवीदीदृशं वाक्यं नारदो मुनिसत्तमः॥ त्वत्पिता भगवान्विष्णुः शंखचक्रगदाधरः॥
अद्य त्वद्विजयं द्रष्टुं गरुडेनागमिष्यति॥ तवैव विजयं द्रष्टुं प्रहृष्टैस्त्रिदशैः सह॥ आगमिष्यति
तत्रैव भगवान्पाकशासनः॥ शंखो नाम दुराधर्षः शंखो दुन्दुभिनिःस्वनः॥ सेतुं संरक्ष्य यत्नेन रामः
तिष्ठते देवकंटकः॥ बलान्यादेन संपीड्य जयार्थेनात्मनात्वया॥ प्रणीयो दुराचारो यथा जाता २३
महास्वना॥ तस्य नादेन घोरेण वज्रनिर्ह्रादवर्चसा॥ भविष्यति यदा चासं दानवानां दुरात्मनाम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDF

घोरे रिपुचिन्तविदारिणः ॥ तन्नादायस्वयं शंखः स्वेरासमरान्तरे ॥ ततो वेगाद्विनिष्पत्य रथेन
रथमूर्धनि ॥ केशं जग्राह ह्वाक स्यसोऽसुरः क्रोधमूर्छितः ॥ ततस्तस्य भयत्रस्तो मुक्तकेशोऽमरा
धिपः ॥ तत्क्षणात्स्वरथं त्यक्त्वा विवेश गगनस्थलम् ॥ ततस्तस्मिन्नवसरे दानवा घोरविक्रमाः ॥
पुरन्दरपुरं भोक्तुं चक्रिरे विस्मयाकुलाः ॥ ततस्तस्मिं क्षणे प्रा[illegible]प्य विमानेन चतुर्मुखः ॥ रणे विजयि
नं वीरं दैत्येन्द्रमिदमब्रवीत् ॥ भेतुं न लभते दैत्य समते दैत्य मम तेजोभिरक्षितम् ॥ पुरन्दरपुरं रम्य म
न्यैरेवामरारिभिः ॥ परायाशु भवेः कीर्तिर्जयेनानेन मानद ॥ तवेन्द्रदमनो नाम सैन्यमेव प्रवर्तते ॥
मयेनासुरमुख्येन पूर्वकाले विनिर्मिते ॥ विलमस्ति महाबाहो जठरे चन्दनागिरेः ॥ तस्मिन्निवससि
स्वेच्छं हे राजन्राजलीलया ॥ विविधोपद्रवग्रस्तेन त्वं स्वर्गे निवत्स्यसि ॥ स्वर्गे निवस्य रत्नानि चि
त्रानि च बहूनि च ॥ मर्त्यलोकं प्रयातव्यं शासनान्मम मानद ॥ एवं संभाष्य दैत्येन्द्रं प्रस्थाप्य थ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प॰ पु॰ रसातलम् ॥ सुरेन्द्रंरणविभ्रष्टंभगवानिदमब्रवीत् ॥ प्रादुर्भावेशचीनाथमथुरायांमधुद्विषि ॥
२२ तस्यपुत्रोमहावीरः प्रद्युम्नइतिविश्रुतः ॥ द्वारकायांयदाजातोमधुकामांगसंभवः ॥ कालशं
बरपूर्वेणसहनिव्यतितेरिपुम् ॥ पुराकृतंतुयत्कर्मत्वयातद्दंगभूपते ॥ त्यक्तव्यमस्माद्वैराग्यंसर्व
मेवममाज्ञया ॥ एवंसंभाष्यनाथेनब्रह्मणाभूरितेजसा ॥ अभिषिक्तःसहस्राक्षः प्रविवेशामरा
वतीम् ॥ ततोरसातलंरम्यंप्रविवेशमहासुरः ॥ गर्जद्भिश्चप्रनृत्यद्भिःस्वसैन्यैः परिवारितः ॥ रसा
तलेप्रविष्टेतुदानवेषुहृष्टमुखे ॥ दुद्रुवुःशरणंसर्वेपन्नगाः पन्नगेश्वरम् ॥ पन्नगानांहितार्थे
नयासुकिर्भुजगाधिपः ॥ दत्वारत्नान्यनेकानिदैत्येन्द्रमिदमब्रवीत् ॥ जितंपूर्वंभवत्कीर्त्यास रामः
र्वमेवरसातलम् ॥ जेतुंनोपेक्ष्यतेराजन्पुनरागत्यविग्रहैः ॥ तस्यतद्वचनंश्रुत्वादत्वायानिबहूनि २२
च ॥ रत्नान्यादायदैत्येन्द्रोमर्त्यलोकंसमापयौ ॥ मर्त्यलोकेचभूपालान्जित्वासर्वान्पृथक्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri. Funding: MoE

न्निर्मलेनिम्नगानटे ॥ गोकर्णेश्वर इत्येवं पृथिव्यां ख्यातिमेष्यति ॥ दशग्रीवादयो वीराः साध
यिष्यन्ति न समास् ॥ तत्करस्थमिदं विष्णोः शृंगमूलं सुशोभनम् ॥ नीत्वा रसातले रम्ये स्थापनी
यं प्रयत्नतः ॥ स च रसे पूज्यते भक्त्या नागदानवराक्षसैः ॥ शृंगेश्वरमिति प्रोक्तं पातालतलवासि
भिः ॥ शृंगाग्रहारिणां पुण्यमनेकं त्रिदशेश्वर ॥ नीत्वा सुरालये रम्ये स्थापनीयं ममाज्ञया ॥ यदा
हरति रक्षेन्द्रस्त्वत्पुराद्वरदर्पितः ॥ स च दक्षिणगोकर्णो भविष्यति पुरन्दर ॥ इत्युक्त्वा भगवानीशः
शुः सुरासुरनमस्कृतः ॥ योतयन्प्रभया काशां हिमवन्तं विनिर्ययौ ॥ ॥ सनत्कुमार उवाच ॥
वाक्यं भगवतः श्रुत्वा ब्रह्मविष्णुपुरन्दराः ॥ विस्मयं परमं जग्मुः किंचिन्मोहवशं गताः ॥ ततो गृही
त्वा शृंगाग्रं हारिणं लोकपूजितम् ॥ अमरावतीं पुरीं रम्यां निर्ययौ त्रिदशेश्वरः ॥ शृंगमूलं तु तं नी
त्वा पाताले रत्नदीपिते ॥ स्थापयामास सहसा भगवान्मधुसूदनः ॥ मध्यमं हारिणं शृंगं चन्द्रमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गामरित्तटे ॥ स्थापयामास तत्रैव भगवान्कमलोद्भवः ॥ ब्रह्मणा स्थापितं श्रुत्वा गोकर्णं भुवनेश्व
रम् ॥ संप्राप्ता मुनयः स्वर्गात्तीर्थयात्राटनार्थिनः ॥ यावन्ति भुवि तीर्थानि गंगादीनि वनोत्तमे ॥
प्रभावाद्देवदेवस्य संभूतानि शुभानि च ॥ अशेषाणि परिभ्रम्य मुनयः संशितव्रताः ॥ ब्रह्माणं
प्रणिपत्याशु गोकर्णं प्रतिपूज्य च ॥ भगवन्त्वद्विना सर्वे स्थातुं नेच्छामहे वयम् ॥ तस्मात्स्वर्ग
मलं कर्तुं प्रसादं कुरु पद्मज ॥ तेषां श्रुत्वा महर्षीणां वाक्यं विगतकल्मषः ॥ प्रक्रीडितमृगाकीर्णे
प्रकीर्णगजगण्डके ॥ कोकिलालापललितचलच्चूतादिपल्लवे ॥ श्लेष्मान्तकवने पुण्ये सदा पु
ष्पितपादपे ॥ निवासाय समादिश्य पौत्रं विश्रवसं मुनिम् ॥ ब्रह्मा मुनिगणैस्सार्धं स्वं राज्यं स
दनं ययौ ॥ ॥ इति श्रीवा॰ प्र॰ पशुपतिपुराणे गोकर्णेश्वरप्रतिस्थापनोनाम ॥१९॥ ॥
सनत्कुमार उवाच ॥ एतस्मिन्नन्तरे काले सुमाली राक्षसाधिपः ॥ अपश्यद्दुहितरं पार्श्वे विश्रव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सो[illegible]ेण गता सानेकसा देवी पितुर्वचनकारिणी ॥ गोकर्णारण्यके रम्यं यत्र विश्रवसं मुनिम् ॥
कन्यां रूपवतीं दृष्ट्वा तन्वंगीं सुपयोधराम् ॥ धर्मेणावरयामास स विश्रवा मुनिपुंगवः ॥ रराम स तया
सार्धं कामसमोहवशंगतः ॥ तुतोष नैकसी चापि लब्ध्वा विश्रवसं पतिम् ॥ तस्या देव्या विशालाक्ष्या ग
र्भो देवभयंकरः ॥ सुषुवे विश्रवासुतं दशग्रीवं महाबलम् ॥ तस्य संजातमात्रेण कंपिता धरणी मुहुर्मुहुः ॥
मांसाभिलाषिणो हृष्टाः पतन्ति दिवि पक्षिणः ॥ ववर्ष रुधिरं चैव मेघो घोरस्वनोऽभवत् ॥ निष्प्रभ
श्च तदादित्यश्चन्द्रश्चैव व्यजायत ॥ पुत्रं दशशिरोपेतं नीलांबुजचयप्रभम् ॥ संप्राप्य विश्रवास्तत्र
तुतोषातिशयं तदा ॥ कालेन वर्धयामास भ्रातृभ्यां सह तद्वपुः ॥ वीर्येण वयसा वापि संश्रितः सर्व
भूर्वह ॥ एकदा तु दिवं याते धनेशं पुष्पकस्थितम् ॥ दृष्ट्वा दशशिरो धीमान्मातरं वाक्यमब्रवीत् ॥ विमा
नं पुष्पकं पुण्यं केनोपायेन विद्यते ॥ स च कस्य सुतो मातः श्रोतुमिच्छामि तद्वद ॥ पुत्रस्य वचनं श्रु

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वानेकशीघ्रारुहासिनी॥अब्रवीदीदृशंवाक्यंविस्मयोद्भूतमानसा॥तवाग्रजोयंहेपुत्रधनेशोलोक
संमतः॥अर्जितंतेनतपसाविमानंपुष्पकंस्थितम्॥त्रैलोक्यमपिवश्यंस्याद्यदिपुत्रत्वमिच्छसि॥
आराध्यतांपितुर्वाक्याच्छंकरंभुवनेश्वरम्॥ततःसंपूजयामासगोकर्णेराज्यलिप्सया॥छित्वाछि
त्वात्मनःशीर्षंपूर्णंहुतिमकल्पयत्॥वर्षाणांहिसहस्राणिदशपूर्णेदशाननम्॥वरंप्रादात्समा
गत्यब्रह्मासुरगणैःसह॥पौत्रंलब्धवरंश्रुत्वासुमालीसहराक्षसैः॥माल्यवन्तंपुरस्कृत्यप्राप्तोलंकाम
नुत्तमम्॥दृष्ट्वासंपूजयामासपौत्रंलब्धवरंतदा॥मुमुदेसहसात्यक्तंलब्धास्पदमिवोत्तमः॥जहर्षव
चनंश्रुत्वासर्वैःसहनिशाचरैः॥लंकाद्वारंसमासाद्यधनेशमिदमब्रवीत्॥त्यजलंकापुरींरम्यांरत्न
तोरणमालिनीम्॥अस्माकंराजधानींतांनत्वंतत्रनिवत्स्यसि॥इत्युक्तस्यवचःश्रुत्वास्वानुजस्य
धनेश्वरः॥श्लेष्मातकवनंगत्वापितरंवाक्यमब्रवीत्॥निशाचरैःसहागत्यदशग्रीवोममानुजः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

लंकां त्याज्यां त्वयेत्युक्तास्थीयते वरदर्पितः ॥ किं कर्तव्यं मयानाथ युद्धायुद्धविवक्षया ॥
तातत्वं सर्वकार्याणां तदादेष्टुं त्वमर्हसि ॥ इत्युक्तस्य स्वपुत्रस्य श्रुत्वा वाक्यं सुपेशलम् ॥
अब्रवीदीदृशं वाक्यं विश्रवा मुनिसत्तमः ॥ कैलाशशिखरोत्तुंगे विस्तीर्णे स्वर्गसन्निभे ॥ म
हादेवसखो भूत्वा वस्तव्यं मम शासनात् ॥ अत्र मन्दाकिनी नाम नदीनां प्रवरा नदी ॥ मानस
श्च सरः पुण्यं तत्रैव प्रविराजते ॥ पितुर्वाक्यमिदं श्रुत्वा धनेशः सह गुह्यकैः ॥ त्यक्त्वा लंकापु
रीं रम्यां कैलाशगिरिमव्रजत् ॥ ॥ इति श्री वा० प्र० पशुपतिपुराणे गोकर्ण० ॥ २० ॥ ॥
सनत्कुमार उवाच ॥ ॥ ततः स्वबान्धवैः सार्धं सर्वैश्चापि निशाचरैः ॥ निवेश्य नगरीं लंकां मु
मुदे स दशाननः ॥ राज्याभिषेकमासाद्य पितामहकरच्युतम् ॥ उद्योगं कारयामास दशास्यो
भ्रातृसम्मतः ॥ धनदं नगरं चापि जित्वा पातालमेव च ॥ सुरेन्द्रं प्रार्थयामास युद्धाय स दशाननः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जित्वा सुरेन्द्रं समरे मेघनादस्यमायया ॥ अमरावतीं पुरीं रम्यां प्रविवेश दशाननः ॥ शृंगाग्रं हारि
णां दृष्ट्वा प्रजितं वज्रपाणिना ॥ उत्पाट्य स्वकरे कृत्वा मुमुदे तिष्ठ यन्तदा ॥ शातमप्सरसां सार्धं र
त्नानि सुबहूनि च ॥ गृहीत्वा स्वबलैः सार्धं प्राप्तवान् स महोदधिम् ॥ दक्षिणोदधिवेलोर्मिमाला
स्खलनमंडिते ॥ विद्रुमद्रुमसंघाते सन्ध्यासमयसन्निभे ॥ मुक्ताफलसमाकीर्णे रत्नोत्पलविभू
षिते ॥ नागदानवनारीणां क्रीडास्थाने मनोरमे ॥ शृंगाग्रं हारिणां पुण्यं सुरेन्द्रभवनाहृतम् ॥ त्रि
कूटमूले संस्थाप्य सन्ध्यामास्ते दशाननः ॥ सन्ध्यावन्दननिष्पन्नो रावणो लोकरावणः ॥ नशशा
कसमुद्धर्तुं वज्रकल्पमिवस्थितम् ॥ शृंगाग्रं हारिणां दृष्ट्वा वज्रकल्पमिवस्थितम् ॥ तं न्यस्त्वा स्व ‌ ‌ ‌ रम्यः
पुरीं लंकां प्रविवेश दशाननः ॥ इन्द्रोपि भगवान् स्वर्गे ब्रह्मणा भूरितेजसा ॥ अभिषिक्तः स्वकं ‌ ‌ ‌ ३९
राज्यं पालयामास लीलया ॥ अथ हृष्टमना भूत्वा रावणो भद्रभक्तिमान् ॥ निर्ममो निलयं तस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri. Funding: MoE-IKS

रत्नतोरणादीपितम् ॥ गोकर्ण्यमेवसं कल्प्योपूजनाद्भावरोगनबै ॥ सचदक्षिणगोकर्णइतिविख्या
पतेभुवि ॥ अद्यापिपूज्यतेभक्त्याराक्षसैर्धर्मकांक्षिभिः ॥ कथितंसर्वमाख्यानंभवद्भिःपरिपृच्छि
तम् ॥ इत्येवंकथितंभृंगेपुण्यात्पुण्यतरंशुभम् ॥ कीर्तितंसनत्केनेत्थंकुमारेणमहात्मना ॥ ॥
इतिश्रीवाव्क्र पशुपतिपुराणे गोकर्णप्रतिष्ठानाम ॥ २१ ॥ ॥ सनत्कुमारउवाच ॥ ॥
नेनाम्नामुनिना पूर्वपालनात्पुण्यकर्मणा ॥ इदंहिमवतःकुक्षौनेपालइतिचोच्यते ॥ अथा
न्यत्संप्रवक्ष्यामितीर्थंनेपालसंज्ञकम् ॥ कामफलदंसर्वपापप्रणाशनम् ॥ नदीवसुमदीचा पुरयं
पिशाकमार्गाचनिम्नगा ॥ तथामणिवतीचापियत्रपुण्यासरिद्वरा ॥ आसुरीन्तृपतनपावा
गवनीहरहासजा ॥ यात्रासांसंगमेपुण्येस्नात्वाकामफलंलभेत् ॥ तेषांतुसंप्रवक्ष्यामिशाक
तीर्थगतंफलम् ॥ क्रमशःश्रूयतांपुत्रपृथक्कामफलप्रदम् ॥ लुन्तिकाश्रममूलेतुरुद्रवत्याःस

पशु.पु. मागमे ॥ विष्णुपद्याजलेस्नानाच्छुक्रस्तुपरिशुध्यते ॥ आयातीर्थोदकेस्नानं ब्रह्मघ्नघाः समा
४० गमे ॥ अर्यमानुच्यतेतत्र पार्श्वेतीर्थाभिषेचितः ॥ अतऊर्ध्वंप्रदेशेनकरटके पर्वतस्यतु ॥ तीर्थं
ब्रह्मबिलंगत्वा ब्रह्मणोवरदोभवेत् ॥ दर्शाः सरलकीर्णायामृगशृंगस्यभूभृतः ॥ वलाकरूपमा
स्थितयत्रधर्मोव्यवस्थितः ॥ वलाकतीर्थमासाद्य ब्राह्मणांयस्तुभोजयेत् ॥ नरकेमग्नमुध्यंग
पितरंत्रायतेनरः ॥ स्नायतेसततंयस्तुतीर्थेपापप्रणाशने ॥ प्रभावाद्धर्मराजस्यनरकंनसपश्य
ति ॥ वलाकोदकसंभेदविष्णुपद्याजलेशुभे ॥ स्नानात्काममवाप्नोतिपितरंचापितृप्यति ॥ न
द्यादेवेन्द्रमार्गायाचन्द्रदीक्षिसमागमे ॥ नवलिंगाक्रमेतीर्थेस्नानान्निर्मलत्वमवाप्यते ॥ पादेप रामः
र्वतराजस्यशृंगशृंगस्यचैवहि ॥ अमोघशिवरोरम्येयक्षासुरनिकेतने ॥ नाम्नासुवर्णधाराख्या ४०
नदीयस्माद्विनिर्गता ॥ तस्याः प्रपतनेस्नानाद्यक्षलोकंसगच्छति ॥ सुवर्णधारासंभेदेशक्रमा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitized by eGangotri ...

गंजले शुभे ॥ प्रयागफलमाप्नोति स्नानान्मासैकमात्रतः ॥ उत्पादिता विशालेन नदी
यस्माद्विनिर्गता ॥ कावेरीमिति विख्यातं शिवक्षेत्रं भविष्यति ॥ अत्रापि चक्रतस्नाना
च्छंकरः प्रीतितुष्यति ॥ सेवयेत्सततं यस्तु स्वर्गं तस्य न दुर्लभम् ॥ कावेरीोदकसंभेदे म
णिवन्याजले शुभे ॥ स्नायते विधिना यस्तु विशालभवनं व्रजेत् ॥ भद्राचलास्थितेरम्येव
काश्रमसमीपतः ॥ भद्रनद्याः शुभे तीर्थे गौरीस्नानं भविष्यति ॥ अत्रगत्वा शिलामूर्तिं यो
र्चयेत्सुरसुन्दरीम् ॥ सेवयेत्सततं यस्तु तस्य स्वर्गफलं भवेत् ॥ वीरावतारणातीर्थे भद्रन
द्याः समागमे ॥ स्नायते विधिना यस्तु वीरलोकं स गच्छति ॥ तत्रावतरते नित्यं हनुमान्
पर्वपर्वसु ॥ तीर्थाभिसेवनात्तत्र कामसिद्धिं स गच्छति ॥ वीरभद्रा च संभेदे ये स्नपन्ति च
मानवाः ॥ स्नानार्थं ये च गच्छन्ति अश्वमेधः पदे पदे ॥ ॥ इति श्रीमा० प्र० पशुपति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

पुराणे तीर्थानन्दक॰ नाम ॥२२॥ ॥सनत्कुमार उवाच ॥अथान्यत्सं प्रवक्ष्यामि ती
र्थं पूर्वोक्तमेव च ॥ सकामफलदं पुण्यं सुरासुरनमस्कृतम् ॥ वाग्वत्यां मणिवत्याश्च संभेदे
लोकपूजिते ॥गच्छामीत्युक्तमात्रेणाभूयान्पापप्रणाशनम् ॥संभेदे मणिवत्यास्तु गन्तुं
यावत्कृतं पदम् ॥तावद्दूर्ध्वगतं स्वर्गे मोदते शिवभक्तिमान् ॥ वाग्वत्यां मणिवत्याश्च सं
भेदे लोकपूजिते ॥स्नायते सततं यस्तु पुण्यवान्कीर्त्यते सतु ॥तत्समीपे समुद्भूता रुद्रधा
रेति चोच्यते ॥कल्पिता देवदेवेन लोकानुग्रहकारिणा ॥भुक्तिमुक्तिप्रदं पुण्यं शिवमायो
पलक्षितम् ॥ रुद्रधारोदयं दृष्ट्वा सर्वपापैः प्रमुच्यते ॥गयाद्या नैमिषाद्याः पिकुरुक्षेत्राश्च
पुष्करात् ॥स्नानं दत्तगुणां ज्ञेयं मणिवत्याः समागमे ॥ब्रह्मवक्त्रसमुद्भूता तीर्थमाता
सरस्वती ॥सोममण्डलसंभूता गंगा त्रैलोक्यपावनी ॥ गौरी स्वेदसमुद्भूता कौशिकी काम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दायिनी ॥ वाग्वती तु सरिच्छ्रेष्ठा यत्र पश्चाद्वगाह्यते ॥ वाग्वतीं सरितां श्रेष्ठां महादेवसु
खोद्भवाम् ॥ न च तत्र फलं विद्यो वाजपेयाश्वमेधयोः ॥ तस्मात्त्वमेव नियुतं यदुक्तं ब्रह्मणा
पुरा ॥ महादेवमुखोद्भूतां किं न संभाव्यते फलम् ॥ तदहं संप्रवक्ष्यामि स्तोत्रं कामफलप्रद
म् ॥ कीर्तनाच्छ्रवणाद्वापि पुण्यं भवति विस्तरम् ॥ ॥ या देव्यराजोपरि नोषित देवदेव
मुक्ताट्टहासनिकलामलवारिधारा ॥ हेमारविन्दरजसा हरिणी नोर्मिमाला सा वाग्वती
दिशतु कामफलं नराणाम् ॥ या कल्पिता पशुपतेः स्नपनाय नित्यं मन्दाररेणुकलिका
मलपुण्यतोया ॥ कुन्देन्दुशंखधवलामलफेनमाला सा वाग्वती दिशतु कामफलं नरा
णाम् ॥ या यत्र पुष्पयतना कुलतीरलेखा सुकोमलामरकतोत्पलपुञ्जभासा ॥ चक्राङ्क
युग्मशवलीकृततीरलेखा सा वाग्वती दिशतु कामफलं नराणाम् ॥ या निम्नगासु रसनिर्जित

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सन्निकाशो शैलाधिराजकाकोन्यलसंस्खलन्तीः ॥ सोपानपंक्तिसदृशाविदशालयस्य
सा वाग्वती दिशतु कामफलं नराणाम् ॥ या पूजिता विकसितैरपि पारिजातैस्तीरोपलेषु
सततं सुरसुन्दरीभिः ॥ नागांगनावदनपंकजशान्तपेना सा वाग्वती दिशतु कामफलं नरा
णाम् ॥ या मानिनामकरकेतुवचोभिरुच्चैः संरक्षणाय हरणाय पिचन्द्रवत्याः ॥ देवाङ्गना
कुचनटाहतवीचिमाला सा वाग्वती ॥ या यक्षकिन्नरमहोरगपूजनीया संपूजिता सुरव
धूभिरनेकपुष्पैः ॥ सिद्धाङ्गनाङ्गपरिमुंचनपुण्यपाथा सा वाग्वती ॥ या सर्वकामफलदा
खिलसाधकस्य क्रीडानुरागजननी वरकामिनी नाम ॥ संपूजिता सुरगणैरपि पुष्पवृष्ट्या
सा वाग्वती ॥ या वंभोद्भवभेद्यपंकजमु— प्रस्यनादागतागीर्वाणादिविसूदने पशुपतो
प्राप्ता परामुन्नतिम् ॥ कूर्मग्राहरुवाकुलातिचपलागंगेव नाकप्रदा सेषा पुण्यतमा पुना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तिसलिलैर्लोकं सदावाग्वती ॥ पीतंवलाद्यदमृतंभृषभेनपूर्वं तंनान्दिनंप्रवितनंभुवनेपदस्तस्मा।
तस्मात्सुरैर्मुनिजनैः प्रवरैः संसेव्यतेसततमप्सरसां चवृन्दैः ॥ त्वां वाग्वतींशतशो नाधिकपु
ण्यतोयां दृष्ट्वा नराः कुसुमरेणुकृतांगरागाम् ॥ निर्धूतकल्मषकषायविशुद्धदेहाः संघाभवन्ति
पुनरेवश्रुतान्तरगाः ॥ पद्मोत्पलैर्वकुल चंपक नागपुष्पैरामोदितंतव पयस्तटजैः प्रसूनैः
फुल्लांकुरैर्विविधचित्रतरैस्तरंगैर्मन्दाकिनीवसुरलोकगतंपुनासि ॥ नेपालमंडलसमस्तनिर
स्तदुःखा या वाग्वती त्रिभुवनेस्वयजातनाया ॥ सेयंपुनातिवहुधावहुरूपा पमुक्ताप्यत्रस्नान
रः स्वजनवन्धुभिराप्तवर्गैः ॥ स्नानावगाहनरतापयपानसेवी गंगेव याम्भसततंपतितश्चनार्यैः ॥
आसंशितायमपिनरंस्मरणां प्रयुक्तां धर्मात्मजं मुनयः पठन्ति ॥ द्वेषेणसिंहगजगंडवरा
हंगा अन्येपितेनवजलंप्रसरन्तास्तु ॥ ब्रह्मेन्द्ररुद्रविधुवह्निसमानरूपास्तेयान्तिरुद्रनिलयंप्र

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विमुक्तशोकाः॥ अन्यस्तु वस्तु परमस्तुतिरप्रेयाया याति निर्मलजया सकलं त्रिलोकमुद्धृ
मिमं पशुपतेस्तवनाय नित्यं संप्रास्थिता सिद्धिरयं प्रतिमोक्षविभूत्यै॥ ॥इति श्री बा० प्र०
पशुपतिपुराणे बाग्वतीस्तोत्रं समाप्तम्॥ ॥संवत् १८८६ पौष श० ७ शुभम्॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऋद्धि तर्पिणी R. ṣi

१५०

६.१९६८८

स्नात स्मी

मु

पुजा वी धा स्मा नवीही

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कः
१

॥ श्रीगणेशाय नमः ॥ ॐ नमः ॥ अथ कात्यायनोक्त स्नानविधिः ॥ अथातो नित्यस्नानं नद्यादौ मृद्गोमयकुशतिल
सुमनस आहृत्यैरकांतं गत्वा शुचौ देशे स्थाप्य प्रक्षाल्य पाणिपादं कुशोपग्रहो बद्धशिखो आचम्य उरुं हे पञ्चोपवी
तितोयमामंत्र्यावर्तयेत् ॐ उरुं हि राजा वरुणश्चकार सूर्याय पंथामन्वेतवा उ अपदे पादा प्रतिधा
तवे कर उता पवक्ता हृदयाविधश्चित् ॐ ये ते शतं वरुणं ये सहस्रं यज्ञियाः पाशा वितता महान्तः तेभि
र्नो अद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः इति तोयमनामिकया त्रिः प्रदक्षिणमालोडयेत्
ॐ सुमित्रिया न आप ओषधयः सन्तु इत्यनेन आपो गृहीत्वा जलिना ॐ दुर्मित्रियास्तस्मै सन्तु
यो स्मान्द्वेष्टि यं च वयं द्विष्म इति एतद्विधिश्च तो द्विशं निनयेत् देशमावेदक्षिणनएवसेक ततआसी राम॰
नां मरं द्वि धावि मज्जेत् नाभिमात्रादाय कटिं वक्षि ऊरू जंघे चरणौ करौ मरशत्रिः प्रक्षाल्य एकपादं ज
लेः धरं स्थले निधाय चामेत् संकल्पः अद्येह स्वा दिदेश कालो स्मन्नात्रामुकगोत्रोत्पन्नोमुकराशिरमु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

इदं विष्णुरिति मेधातिथिर्ऋषिर्विष्णुर्देवता गायत्रीच्छन्दो मृद्ग्रहणे विनियोगः

कश्यपोहं छंदसामाचार्यस्सिद्धये कामायनोक्तविधिना स्नानं करिष्ये ॐ उदकाय नमः इत्युदकेन
मस्तकम आलभेदं गास्तिमृदेदं विष्णुरिति ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं समूढमस्य पां
सुरे स्वहा मंत्रेण मृदं गामालभेत् इति प्रसंगमंत्रात् स्वाद्वितीयमागमृत्तां गामालभेते ॐ अश्व
क्रांते रथक्रांते विष्णुक्रांते वसुंधरे मृत्तिके ब्रह्मदत्तासि काश्यपेनाभिमंत्रिता दक्षिणहस्तेन नाभे
रूर्ध्वं वामहस्तेन नाभेरधः ततो नाभिदध्ने जले स्थित्वा ॐ आपो अस्मान्मातरः शुन्धयन्तु घृतेन
नो घृतप्वः पुनन्तु विश्वं हि रिप्रं प्रवहन्ति देवीरिति निमज्ज्य ॐ उदिदाभ्यः शुचिरापूत एमीइत्तिप
ष्ठितोन्मज्य ततस्त्रीनि मज्जोन्मज्जाचामेत् मानस्तोके त्रिगोमयेनांगानि विलिंपयेत् ॐ मानस्तो
के तनये मान आयुषि मानो गोषु मानो अश्वेषु रीरिषः मानो वीरान्रुद्र भामिनो वधीर्हविष्मन्तः सद
मित्त्वा हवामहे अयमग्रे चरन्तीनामोषधीनां रसं वने तासामृषभपत्नीनां पवित्रं कायशोधनं प

आपो अस्मानिति प्रजापतिऋषिरापो देवता अनुष्टुप्छन्दो मज्जने विनियोगः।

श्रीः क्षेरोगंच शोकंच वनश्येहरन्तु गोमयं ॥ इति मंत्रेण दक्षिणपाणि गृहीतेन गोमयेन मुखतो नाभिपर्यन्तं वा
२ मकरगृहीतेन नाभितोऽघ्रिपर्यन्तं विलिंपेत् दर्वं वन्तास्ना ततस्तुलुकेन जलमादाय प्रतिमंत्रं स्व
शिरोऽभिषिंचेत् ॐ इमम्मे वरुण श्रुधी हवमद्या च मृडय त्वामवस्युराचके ॐ तत्वा यामि ब्रह्मणा
वंदमानस्तदाशास्ते यजमानो हविर्भिः अहेडमानो वरुणेह बोध्युरुशंसमानः आयुः प्रमोषीः
२ ॐ त्वन्नोऽअग्ने वरुणस्य विद्वान्देवस्य हेडोऽअवयासिसीष्ठाः यजिष्ठो वह्नितमः शोशुचानो
विश्वाद्वेषांसि प्रमुमुग्ध्यस्मत् ३ ॐ सत्वन्नोऽअग्नेवमो भवोती नेदिष्ठोऽअस्याऽउषसो व्युष्टौ
अवयक्ष्वनो वरुणं रराणो वीहि मृडीकं सुहवो नऽएधि ४ ॐ मापो मोषधीर्हिंसीर्द्धाम्नो
धाम्नो राजंस्ततो वरुण नो मुञ्च यदाहुरघ्न्याऽइति वरुणेति शपामहे ततो वरुण नो मुञ्च ५ ॐ राम
उदुत्तमं वरुणपाशमस्मदवाधमं विमध्यमं श्रथाय अथा वयमादित्य व्रते तवानागसोऽअ २

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रितये स्वाम ६ ॐ मुञ्चन्तु मा शपथ्याद् अथो वरुण्यादुत अथो यमस्य पड्वीशात्सर्वस्माद्देवकिल्बिषा
त् ७ ॐ अवभृथ निचुंपुण निचेरुरसि निचुंपुणः अवदेवैर्देवकृतमेनो यासिषमव मर्त्यै र्म
र्त्यकृतम्पुरुराव्णो देवः रिषस्पाहि ८ इत्यष्टाभिः प्रतिमंत्रैः स्वशिरसि सिंच्य ततो नवेति जलेन
प्योंमिमुखो मौनी सकृन्निमग्नो न्यस्याचामेत् ततो दर्भाग्रैर्नोपरि देशमारभ्य हृत्सिरोणां गस्पर्शद
र्भाग्रस्थितजलविन्दुभिर्मूर्ध्नि सिंचेत् तत्र मंत्राः ॐ पुनातु ॐ भूः पुनातु ॐ भुवः पुनातु
ॐ स्वः पुनातु ॐ भूर्भुवः स्वः पुनातु ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचो
दयात् ॐ सर्वं पुनातु ॐ आपो हि ष्ठा मयो भुवस्तान ऊर्जे दधातन महेरणाय चक्षसे २ यो वः
शिवतमो रसस्तस्य भाजयतेह नः उशतीरिव मातरः ३ तस्मा अरं गमाम वो यस्य क्षयाय जिन्व
थ आपो जनयथा च नः ४ इदमापः प्रवहतावद्यं च मलं च यत् यच्चाभिदुद्रोहानृतं यच्च शेपे अ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऋः भीरुणम् ५ हविष्मतीरिमाऽआपो हविष्मांऽआविवासति । हविष्मान्देवोऽअध्वरो हविष्मांऽअस्तु
३ सूर्यः ६ देवीरापोऽअपान्नपाद्यो वऊर्मिर्हविष्यऽइन्द्रियावान्मदिन्तमः तं देवेभ्यो देवत्रा दत्त शु
क्रपेभ्यो येषां भाग स्थ स्वाहा ७ कार्षिरसि समुद्रस्य त्वाक्षित्याऽउन्नयामि समापोऽअद्भिरग्मत सम
ओषधीभिरोषधीः ८ आपो देवा मधुमतीरगृभ्णन्नूर्जस्वती राजस्वश्चितानाः याभिर्मित्राव
रुणावभ्यषिञ्चन्याभिरिन्द्रमनयन्नत्यरातीः ९ द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव पू
तम्पवित्रेणेवाज्यमापः शुन्धन्तु मैनसः १० शन्नो देवीरभिष्टयऽआपो भवन्तु पीतये शंय्योर
भिस्रवन्तु नः ११ अपां रसमुद्वयसं सूर्ये सन्तं समाहितम् अपां रसस्य यो रसस्तं वो गृ ए.मु.
ह्णाम्युत्तमम् १२ अपो देवीरुपसृज मधुमतीरयक्ष्माय प्रजाभ्यः तासामास्थानादुज्जिहतामो ३
षधयः सुपिप्पलाः १३ पुनन्तु मा पितरः सोम्यासः पुनन्तु मा पितामहाः पुनन्तु प्रपितामहाः प

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

षि२

वित्रेण शतायुषा पुनन्तु मा पितामहाः पुनन्तु प्रपितामहाः पवित्रेण शतायुषा विश्वमायुर्व्यश्नवै
१४ अग्नः आयूं॰ [illegible] पवसः आसुवोर्ज्जमिषञ्चनः आरेबाधस्व दुच्छुनाम् १५ पुनन्तु मा देवजनाः
पुनन्तु मनसा धियः पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा १६ पवित्रेण पुनीहि मा शुक्रेण देव
दीद्यत् अग्ने क्रत्वा क्रतूँरनु १७ यत्ते पवित्रमर्च्चिष्यग्ने विततमन्तरा ब्रह्म तेन पुनातु मा १८ पव
मानः सोऽअद्य नः पवित्रेण विचर्षणिः यः पोता स पुनातु मा १९ उभाभ्यां देव सवितः पवित्रेण सवे
न च मां पुनीहि विश्वतः २० वैश्वदेवी पुनती देव्यागाद्यस्यामिमा बह्व्यस्तन्वो वीतपृष्ठाः तया मद
न्तः सधमादेषु वयं स्याम पतयो रयीणाम् २१ ॐ विसते मां पुनात्वच्छिद्रेण पवित्रेण सूर्य्यस्य
रश्मिभिः तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम् २२ ॐ वाक्पतिर्मा पुनातु इत्या
दि॰ केशप्रमन्त्राः २३ ॐ देवो मा सविता पुनात्वच्छिद्रेण पवित्रेण सूर्य्यस्य रश्मिभिः तस्य ते पवित्रपते प

ग्रा

ऋः ४ वित्तदत्तस्यपत्नकामः पुनेनचक्रेकेयम् २४ ततः पुनातिमादिंऽपत्रंपठित्वा ततः इमम्मे॰ तत्वा॰त
नः सत्वम्॰नापः ३३ तमं मुंचंतु मा॰ अवभृथनिचुम्पुणइत्यचमिर्मंत्रैः एवं वतपावयेत् ॐ ऋतं
च सत्यं चाभीद्धात्तपसोध्यजायत ततो रात्रिरजायत ततः समुद्रोअर्णवः समुद्रादर्णवादधि संवत्
सरोऽअजायत॰ अहोरात्राणि विदधद्विश्वस्य मिषतो वशी सूर्याचंद्रमसौ धाता यथा पूर्वमक
ल्पयत्॰ दिवंच पृथिवींचान्तरिक्षमथो स्वः इमंत्रमंत्रैस्त्रिः पठेत् दुपदादिवेति आपंगोरितिऋक्
त्रयेवापालाशमंवासत्रिरमौंकारंवा विस्मोवोस्मरणं त्रिरावर्त्तयेत्॰ एतेविकल्पाः शक्त्यनुसारेण
फलमेदाश्चसेया इति स्नानविधिः उत्तीर्य्य धौतेवाससीपरिधायपयाश्नातं मध्याह्नसंध्याकुर्या
त् मध्याह्नसंध्यायांसर्व्वोपस्थाने विभ्राडुहत्॰ पुरुषसूक्तंचपठेत् यथाशक्तिस्वाध्यायंकृत्वा मत्युः एमः ४
रुद्राल्लरणं च पठित्वा तर्प्पणं कृत्वा॰ देवतर्प्पणं जीवत्पितृभिः कुर्यात् अथातः संप्रवक्ष्यामि ऋषीणां

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तर्पणं शुभं श्रावणी पौर्णिमायां तु विधानं कारयेद्बुधः श्रवणर्क्षे च ऋग्वेदे यजुर्वेदे च पौर्णिमा ह
स्ते छंदोगणस्तायां ततीयायां नमस्तु २ विधानं तत्र कर्त्तव्यं यदुक्तं ब्रह्मपुंगवैः नद्यां गत्वा तडागे
वा शोभने निर्मले जले ३ आदौ स्नानविधिं कुर्यान्नित्यकर्म समापयेत् सम्मत्याथानुशास्त्राद्य ब्रह्म
णैपि समन्वितान् ४ स्वस्तिवाच्यं ततः पूर्वं ऋग्यजुःसामथर्वणैः आदौ गणपतिं स्थाप्य विधिं विदेवमा
तरं ५ गौतमाद्यान्ऋषीन्सप्त अरुंधत्या सहात्मान् कलशं स्थापयेत्तत्र मंत्रैर्नानाविधैः शुभैः ६ प्र
तिष्ठा मंत्रपठनं पश्चात्पूजा समारभेत् गंधपुष्पैस्तथा धूपैर्दीपैर्नैवेद्यसंयुतैः ७ तर्पणं च समारं
भ्य वेदमंत्रैः सुशोभनैः ऋचाः स्तंत्रं प्रवक्ष्यामि यदुक्तं ब्रह्मपुंगवैः गणानां त्वा तथा ब्रह्मन् गायत्रीं
देवमातरं सप्त ऋषयेति मंत्रैर्जातवेदाः समन्विते ९ मूर्द्धानं यस्तथा छंदः षड्च स्तर्पयेत्सुधीः अ
ग्ने प्रवः पंच तथाग्निर्देवता पुनः १० मधुश्रुक्तं नमश्चैव सहस्रैतिन पस्तथा अग्निरेकाक्षरे सा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कः द्विपदृग्वः पापनाशनः ११ अवेष्टादिक्रचः पंच अस्यमस्तुर्धिनश्यति अग्ने भौगक्रचस्त्रीणि एकपा
५ स्तुवनश्चतुः चनस्तोरश्मिनासस्याराजस्यादिक्रचोदश सहस्रशीर्षा पुरुषः नमस्तेतु सकृत्स्मोठत्
१२ इषेत्वा नर्पयदेवः कृस्नोस्यध्यायनामतः ईशावास्यंचसंपूर्णं नर्पणं कारयेद्बुधः १४ इमावेवगो
नमेसथवंशः समानयः अथवंशस्तदिदं चाग्निवेश्यः सैनवाच्यः १५ आत्रेयायवंशः काश्यपी
वालाभामाठरीतिच आलंवीचनयामाग्नीक्रचो द्वादशकं पठेत् १६ ततोसौ कलशस्थापने ॐ मही
द्यौः पृथिवीचनः इमं यज्ञं मिमिक्षतां पिपृतान्नो भरीमभिः इतिमंमिंस्मरेत् ततो यवक्षेपः ॐ ओ
षधयः समवदन्तु सोमेन सहराज्ञा · यस्मै कृणोति ब्राह्मणस्तं राजन्पारयामसि अथ दध्यक्षतचं
दनचर्चितं कलशं स्थापयेत् ॐ आजिघ्र कलशं मह्यात्वाविशन्त्विंदवः पुनरूर्जानिवर्तस्वसानः सहस्रं राम
धुक्ष्वोरुधाराः पयस्वती पुनर्माविशताद्रयिः इति कलशस्थाप्य जलेनापूरणं ॐ वरुणस्योत्तम्भन ५

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मसिवरुणस्स्कंभसर्ज्जनीस्थो वरुणस्य ऋतसदस्यसि वरुणस्य ऋतसदनमसि वरुणस्य ऋतसद
नमासीद अथ ब्रह्मस्थापनं ॐ आ ब्रह्मन्ब्राह्मणो ब्रह्मवर्च्चसी जायतामाराष्ट्रे राजन्यः शूर इषव्
योतिव्याधिमहारथो जायतां दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णूरथेष्ठाः सभे
योयुवास्य यजमानस्य वीरो जायतां निकामे निकामे नः पर्ज्जन्यो वर्षतु फलवत्यो नः ओषधयः पच्यतां
योगक्षेमो नः कल्पताम् गंध॰ गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीं ईश्वरीं सर्व्वभूतानां तामिहो
पह्वये श्रियं दूर्वा ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि॰ एवानो दूर्वे प्रतनु सहस्रेण शतेन
च फलं ॐ याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः बृहस्पतिप्रसूतास्तानो मुञ्चन्त्वंहसः
अथ पंचपल्लवाः ॐ अश्वत्थे वो निषदनं पर्णे वो वसतिः कृताः गोभाज इत्किलासथ यत्सनवथ पुरु
षम् सर्वौषध्य हरिद्रा वा ॐ याः ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा मनैनु बभ्रूणामहं शतं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सं: ९

धामानि सप्त च पंचमद्ः ॐ स्योना पृथिवी नो भवान् स्वर्णिवेशनि यच्छा नः शर्म्म सप्रथाः पेवुरत्नानि
ॐ परिवाजः पतिः कविरग्निर्हव्यान्यक्रमीत् दधद्रत्नानि दाशुषे पयः ॐ पयः पृथिव्यां पयऽओष
धीषु पयो दिव्यन्तरिक्षे पयो धाः पयस्वतीः प्रदिशः सन्तु मह्यम् दधि ॐ दधिक्रा ऽअकारिषं जि रा.को
ष्णोरश्वस्य वाजिनः सुरभि णो मुखा करत्प्रणऽआयूंषि तारिषत् घृतं घृतवती भुवनानामभिश्रि
यो र्वी पृथ्वी मधुऽधे सुपेशसा द्यावापृथिवी वरुणस्य धर्म्मणा विष्कभितेऽअजरे भूरि रेतसा हिर
ण्यं ॐ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत् सदाधार पृथिवीं द्यामुतेमां कस्मै
देवाय हविषा विधेम अयवस्त्रं ॐ प रिस्थायवासऽउपस्तराणस्य धीवासं ज्यानि हिरण्यान्यस्मै
सन्त्वानमर्व्वन्तस्सद्वीशस्त्रियादेवेषामामयन्ति ॐ युवा सुवासाः परिवीत आगात्सऽउश्रेयान्भव एम:
ति जायमानः तं धीरासः कवयऽउन्नयन्ति स्वाध्यो मनसा देवयन्तः अथ उपरिधाम स्वर्णपात्रं ॐ ९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पूर्णादर्विपरापतसुपूर्णापुनरापततु वस्ते वविक्रीणावहैः १ ईषमूर्जंशतक्रतो ततःकलशाभिमं
त्रणं कलशस्यमुखेविष्णुः कंठेरुद्रः समाश्रितः मूलेतस्यस्थितोब्रह्मामध्येमातृगणाःस्थिताः १
कुक्षौतुसागराः सप्तसप्तद्वीपावसुंधराः ऋग्वेदोथयजुर्वेदसामवेदोह्यथर्वणः २ अंगैश्चसहिताः
सर्वेकलशंतुसमाश्रिताः सर्वेसमुद्राःसरितस्तीर्थानिजलदानदाः ३ इतिकलशप्रार्थना देवदान
वसंवादेमथ्यमानेमहोदधौ ४ उत्पन्नोसितदाकुंभविधृतोविष्णुनास्वयं त्वत्तोयेसर्वतीर्थानिदेवाः
सर्वेत्वयिस्थिताः ५ त्वयितिष्ठंतिभूतानित्वयिप्राणाःप्रतिष्ठिताः शिवस्वयंत्वमेवासिविष्णुस्त्वंचप्र
जापतिः ६ आदित्यावसवोरुद्राविश्वेदेवामरुद्गणाः त्वयितिष्ठंतिसर्वेपियतःकामफलप्रदाः ७
त्वत्प्रसादादिमंयज्ञंकर्तुमीहेजलोद्भव सान्निध्यंकुरुमेदेवप्रसन्नोभवसर्वदा ८ स्थिरोभववीड्वंगः १ ग
आशुर्भववाज्यर्वन् पृथुर्भवसुखदस्त्वमग्नेःपुरीषवाहनः एतनेतिप्रतिष्ठाप्य ॐभूर्भुवस्वः प्रजनदहा

ग्र: गच्छेहतिष्ठ ॐ वरुणइहागच्छेहतिष्ठ ॐ तत्वायामि ब्रह्मणावंदमानस्तदाशास्ते यजमानोहविर्भिः ॐ हे
७ डमानोवरुणेहबोध्युरुशंसमानऽआयुःप्रमोषीः इतिकलशेस्थाप्य ग्रहानावाहयेत् ॐ आकृष्णेनर
जसावर्त्तमानोनिवेशयन्नमृतं मर्त्यञ्चहिरण्ययेनसविता रथेनादेवोयातिभुवनानिपश्यन् ॐ भू
र्भुवः स्वः सूर्य इहागच्छेहतिष्ठ एवमन्येषामपि ॐ इमन्देवाऽअसपत्नंसुवद्ध्वंमहतेक्षत्रायमहतेज्ज्यै मि
ष्ठायमहतेजानराज्यायेंद्रस्येन्द्रियाय ॐ इममुष्यपुत्रममुष्यैपुत्रमस्यैविशऽएषवोमीराजासोमोस्माकं
ब्राह्मणानांराजा ॐ भूर्भुवःस्वः सोम इहागच्छेहतिष्ठः २ ॐ अग्निर्मूर्द्धादिवःककुत्पतिःपृथिव्याऽअय
म् अपांरेतांसिजिन्वति ॐ भूर्भुवःस्वः भौम इहागच्छेहतिष्ठ ३ ॐ उद्बुध्यस्वाग्नेप्रतिजागृहित्वमिष्टा
पूर्त्तेसंसृजेथामयंच अस्मिन्सधस्थेऽअध्युत्तरस्मिन्विश्वेदेवायजमानश्चसीदत ॐ भूर्भुवःस्वःबु एम:
ध इहागच्छेहतिष्ठ ॐ बृहस्पतेऽअतिऽअर्य्योऽअर्हाद्द्युमद्विभातिक्रतुमज्जनेषुयद्दीदयच्छवसऋत ७

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रजातदस्मासुद्रविणन्धेहिचित्रम् ॐ भूर्भुवः स्वः बृहस्पते इहागच्छ इहतिष्ठः ५ ॐ अन्नात्परि
स्रुतोरसंब्रह्मणाव्यपिबत्क्षत्रम्पयः सोमंप्रजापतिः ऋतेनसत्यमिन्द्रियंविपानं शुक्रमन्धसः
इन्द्रस्येन्द्रियमिदम्पयोमृतंमधु ॐ भूर्भुवः स्वः शुक्र इहागच्छ इहतिष्ठ ६ ॐ शन्नोदेवीरभिष्टयः आ
पोभवन्तुपीतयेशंयोरभिस्रवन्तुनः ॐ भूर्भुवः स्वः शनैश्चर इहागच्छ इहतिष्ठ ७ ॐ कयानश्चित्र
आभवदूतीसदावृधः कयाशचिष्ठयावृता ॐ भूर्भुवः स्वः राहो इहागच्छ इहतिष्ठ ८ ॐ केतुङ्कृण्वन्न
केतवेपेशोमर्य्याऽअपेशसे समुषद्भिरजायथा ॐ भूर्भुवः स्वः केतो इहागच्छ इहतिष्ठ ९ ॐ भूर्भुवः
